# ख्यातिवादः

श्री शङ्करचैतन्यभारतीविरचितः

ग्रन्थकृतैव संशोधितः

THE

# KHYĀTI-VĀDA

by

S'ANKARA CHAITANYA BHĀRATI

*Edited by*

S'ANKARA CHAITANYA BHĀRATI

with a Foreword

by

M. M. Pt. Gopinath Kaviraj

# FOREWORD

The problem of Error, in its metaphysical, logical and psychological aspects, has been accorded a prominent place in every system of Indian Philosophy, both ancient and modern. The question has been discussed in each school from its peculiar standpoint and the view consistent with the standpoint boldly defended as against the various other views current in the schools. The history of Indian Philosophy records numerous theories on this vexed question, of which the anyathakhyati, the akhyati, the atmakhyati, the satkhyati, the asatkhyati, the sadasatkhyati and the anirvachaniyakhyati occupy the most prominent place. The Vibhramaviveka of Mandana Mis'ra briefly touched on some of these theories.

The following pages embody a new but original contribution on this subject from the viewpoint of Sānkara Vedānta. The author in the booklet passes in review the different theories of Error and points out the logical defects inherent in each. As he represents the monistic position of S'ānkarāchārya, almost every theory not consistent with his own has its share of sharp criticism.

The Anirvachanīyakhyāti of Vedānta implies that the entire Universe is an appearance, unreal in content, projected by Reality and imposed on Itself through its own self-alienating Power, which though positive in nature is spoken of as indescribable on account of its being differentiated from Pure Reality on one hand and from Absolute Non-entity on the other. Reality is the back-

ground, so to say, of the play of its Power, which has a double aspect concealing as it were its unique substrate in one and revealing infinite varieties of phenomena in the other. The vedantic literature explains in different ways how this mysterious process in at all possible. The psychology and logic of Error in monistic Vedanta has to keep in view the basic peculiarity of the system and is therefore a study replete with great interest.

The doctrine of Adhyasa, or erroneous superimposition which has found a brilliant treatment in S'ankaras commentary on Brahma Sutras and most of the subsequent works commenting on or based on it (e.g. Bhāmatī, Ratnaprabhā, Panchapādikā, Panchapādikā vivarana, Vivarana prameya sangraha etc.) accounts for the possibility of confusion between Self and Not-self, between Spirit and Matter and between the Eternal and the Temporal.

I hope the curious reader interested in philosophical studies will find in the booklet ample food for reflection

Govt. Sanskrit College,
Benares.

GOPINATH KAVIRAJ.

| विषय | पृष्ठ |
| --- | --- |
| मङ्गलम् | १ |
| विप्रतिपत्त्युपयोगः | २ |
| साकारख्यातिविप्रतिपत्तिः | ३ |
| असत्संसर्गख्यातिविप्रतिपत्तिः | ४ |
| सर्वासत्ख्यातिविप्रतिपत्तिः | ६ |
| सत्ख्यातिविप्रतिपत्तिः | ७ |
| अख्यात्यन्यथाख्याति विप्रतिपत्तिः | ७ |
| अनिर्वाच्यख्यातिविप्रतिपत्तिः | ८ |
| अनिर्वाच्यख्यातिविप्रतिपत्त्यन्तरम् | १० |
| सदसत्ख्यातिविप्रतिपत्तिः | १४ |
| साकारख्यातिनिरूपणम् | १६ |
| साकारख्याति खण्डनम् | २१ |
| असत्संसर्गख्यात्युपपादनम् | २४ |
| भट्टजैनविज्ञानभिद्वभिमत ख्यातिविवेचनम् | २५ |
| असत्संसर्गख्यातिखण्डनम् | २७ |
| सर्वासत्ख्यातिनिरूपणम् | २७ |
| सर्वासत्ख्याति निरासः | ३१ |
| अख्यात्युपपादनम् | ३५ |
| अख्यातिनिरासोऽन्यथाख्यात्युपपत्तिश्च | ४१ |
| अन्यथाख्यातिनिरासोऽनिर्वचनीयख्यात्युपपादनं च | ४६ |
| अनिर्वाच्यख्यातिप्रक्रियानिरूपणोपक्रमः | ५६ |
| अनिर्वाच्यख्यातौ गौरवोद्धारः | ६७ |
| श्रीनिम्बार्कवल्लभमाध्वादिसंमतख्यातिनिरूपणम् | ७० |
| श्रीरामानुजाभिमतख्यातिखण्डनम् | ७२ |
| उपसंहारः | ७६ |

ॐ नमः परमात्मने ।

# ख्यातिवादः

आकृतिं या निराकृत्य सच्चिदानन्दशब्दभाक् ।
सद्वचोभ्योऽधिगन्तव्या तां परां समुपास्महे ॥ १ ॥

सादरं तं नमस्कुर्वे विश्वरूपं तु भारतीं ।
पादाम्बुजेषु यस्यासन् शिष्यालयः समन्ततः ॥ २ ॥

ख्यातावत्रापि यदिहोह मयात्र किञ्चित्
सन्दृभ्यते सुनिपुणं परिगृह्य सारम् ।
ज्ञानं विरञ्चिपति चेदनुमोदनीयः
कृत्यैतया सुकृतिभिः प्रकृतिं स्मरद्भिः ॥ ३ ॥

हेत्वात्मनाऽस्तु नवनीतमथापि नीतम्,
कार्यात्मना जनयितुं नहि यत्यते न ।
मृत्स्नामुपेत्य कलशो जनिमेतु लोके,
तां नैव वाञ्छति जनो जलहर्तुकामः ॥ ४ ॥

मायामालम्ब्य नृत्यच्छ्रुतिशिखरशतैर्ज्ञाप्यमानं परं यत्,
योगारूढैर्मुनीन्द्रैः परिहृतविषयैः काम्यमानं विमुक्त्यै ।
चित्तं चैत्तं च बुध्यद्विगतमलिनिमाभासमानं त्वहञ्च,
गोभिर्गोपैश्च नित्यं वलयितमपि न द्वैतमालम्बते यत् ॥ ५ ॥

प्रत्यहं तन्नमस्कुर्वन् शङ्करचेतनो मुनिः ।
भारतीपदमालम्ब्य भारतीदययाचितः ॥ ६ ॥

शास्त्रविस्तृतकान्तारे परिक्राम्यति यः सदा ।
मोदमानो विनोदाय लेखनीमुदतिष्ठिपत् ॥ ७ ॥

इह तावद्भ्रान्तिर्न कस्य जायते "स्थाणौ मम चौरप्रतीतिः समजनि" इत्याऽऽभीरदारेभ्योऽनुभवात् तथापि परीक्षकैस्तत्र विप्रतिपद्यमानैर्लौकिकव्यवहारमनुरुन्धानैः सा विविधमुपपाद्यतेऽतएव च तेषां विप्रतिपत्तिः संशीतिजननीभूयमनुभूय विचाराङ्गभावमश्नुते, विचारविनिर्वर्त्त्या हि संशीतिः विप्रतिपत्तिं विना न निर्वहतीत्याविचारारम्भमनुवर्तमानापि विप्रतिपत्तिःतदुत्पादनेनैव न्यायाङ्गमितिस्थितिः। तत्र च "सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनमिति" नीतिमनुसरता इत्थमेवानुरूपं सर्वमपि निर्वक्तुमर्हम् येन सिद्धमेवानुरुध्येत नो चेत्सार्वजनीनमनुभवमन्यथाकुर्वता लक्षणादिनिर्माणेन स्वानभिज्ञतामवद्योतयता वादिना पराजितेन किमिति न भाव्यम्; एवं निर्वक्तुमनीशानो हि स्वबुद्धिमध्यासीनेन येन केनापि लक्षणाभासेनानुभूतिमेवान्यथयतीति विद्वज्जनैरुपेक्षणीयतामेवापद्यते।

तत्र चानिर्वचनीयख्यातिवर्ज-तत्तत्ख्यातिं निरुच्य व्यवहृतिसिद्धमपह्नुवते वादिन इति व्यक्तीकरिष्यते। एतादृशविषयेषु विप्रतिपत्तिषु बह्वीषु जागरूकास्वपि "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इति भणितिमालम्बमानैः किन्नाम यन्न निर्णेतुं पार्यते इति प्रतिपत्त्रा मोदमानेनैव भाव्यम्—न तु दूयमानमानसेन।

अपि च शाङ्करेषु जीवत्सु तार्किकादयः प्रतिभटा जीवितुमेव नोत्सहन्ते। सर्वेषामपि बाह्याबाह्यदर्शनानां वेदान्तोत्सङ्गमनासाद्य न निर्वाहः। समुल्लसन्तु तानि वेदान्तैकवाक्यतामापद्य नाम, न निवारयामः, नो चेत्खण्डनदुर्गतिपूरैः प्लावनीयानीति न मनागवधोरवकाशोऽपीति। तत्र विप्रतिपत्तयः "जाग्रति हि प्रकारेषु विवादा न तु धर्मिणि। प्रकारे सन्दिहानोऽपि संशेते नहि

धर्मिणि" ॥ धर्मिप्रकारको न सन्देह इत्यर्थः ।

प्रथमा साकारख्यातौ—शुक्तिगतत्वेन भासमानो रजतत्वादिर्ज्ञानवृत्ति र्नवा—

विज्ञानमेव तत्तदाकारेण प्रथते इति ब्रुवाणस्य योगाचारस्य विधिकोटिः, निषेधकोटिरन्येषाम्, ज्ञानवृत्तित्वं ज्ञानत्वादौ प्रसिद्धम्-तदभावश्च बाह्यत्वे । यद्यपि बाह्यत्वे भ्राम्यतः बाह्यत्वमपि ज्ञानाकारः, तथापि वस्तुस्थितिमनुरुध्योभयत्र मते बाह्यत्वं न ज्ञानधर्मः किन्तु आन्तरत्वमेवेति बोध्यम् । बाह्यत्वं भासमानमपि अलीकं न ज्ञानाकार इति हि बौद्धा मन्वते ।

ननु विधिकोटौ सिद्धसाधनम्, विषयतासम्बन्धस्य वृत्तिनियामकत्वपक्षे तेन सम्बन्धेन रजतत्वस्य ज्ञाने वृत्तितायाः नैयायिकैरभ्युपगमनीयत्वात्, एवं कालिकादिनाऽपि तद्बोध्यम्, समवायसम्बन्धावच्छिन्नवृत्तितासाध्यता तु न शङ्कास्पदमेव, बौद्धानां समवायस्य शशशृङ्गायमाणत्वात्, तथा च बाधः, एवं घटज्ञाने रजतत्वस्यवृत्तेर्बाधः, अपुरोवृत्तिशुक्तिगतत्वेनाभासमानत्वाच्च पक्षाप्रसिद्धिः, देवदत्तीयभ्रमीयरजतत्वस्य यज्ञदत्तीयज्ञानेऽवृत्तेश्च बाधः, प्रभाकरेण च पक्षाऽप्रसिद्ध्या प्रत्यवस्थेयम्, नो खलु तदीये नये रजतत्वं शुक्तिगतत्वेन भासते, भ्रमानभ्युपगमेनान्यगतधर्मस्यान्यत्राभासनात् । भगवद्रामानुजादिभिः सर्वज्ञानयाथार्थ्यवादिभिरपि शुक्तिगतत्वेन रजतत्वभानमभ्युपगम्यत एव, सर्वस्य सर्वात्मकत्वेन त्रिवृत्करणश्रुत्या शुक्तावपि रजतत्वस्य रजतावयवसत्त्वप्रयुक्तं सत्त्वमस्त्येवेति न तेषाम्मते तु पक्षाप्रसिद्धिः शक्यशङ्केति ध्येयम् ।

एवं निषेधकोटावपि विषयितादिना वृत्तेः सत्त्वाद्बाधः समवायेन वृत्त्यभावसाधनेऽर्थान्तरम्, परेषां प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिश्च स्यात्, पुरुषान्तरीयज्ञानमादाय

सिद्धसाधनमर्थान्तरञ्चास्त्येव, अन्यथाख्यात्यादिसिद्धिं विनापि साध्यस्य पक्षे उपसंहर्तुं शक्यत्वात् । एवमन्यविषयकज्ञानमादायापि उक्तदोषद्वयं बोध्यम्, प्रभाकरेण च पूर्वाभिहितदिशा पक्षाप्रसिद्धिरुद्भावनीयैवेति चेत्,

मैवम्, विषयतादिसम्बन्धानां वृत्त्यनियामकत्वाज्जन्यमात्रस्य च कालोपाधित्वाभावान्न प्रथमाभिहितो दोषः । नहि सन्ति स्वारसिकाः प्रत्ययाः, यैः परवन्तो वयं तादृशसम्बन्धानां वृत्तिनियामकत्वमातिष्ठेमहि । अभ्युपेत्य परं समादध्मः । तत्पुरुषीयतद्भ्रमीयशुक्तिनिष्ठपुरोवर्तित्वावच्छिन्नविशेष्यतानिरूपितप्रकारताश्रयो रजतत्वादिः तत्पुरुषीयतज्ज्ञानतादात्म्यापन्नो न वा, विधिकोटिर्ज्ञाने प्रसिद्धा, तादात्म्यसम्बन्धस्याभेदाभिषिक्तस्यानभ्युपगतावपि नैयायिकातिरिक्तैः, ज्ञानात्मकत्वं तु नाप्रसिद्धम्, तत्पुरुषीयत्वादिनिवेशात् पुरुषभेदनिबन्धनो ज्ञानभेदनिबन्धनश्च दोषोऽपाहारि, एकदा च न द्वाभ्यां विवाद इति सम्प्रदायात् नैयायिकादिना विचारप्रसङ्गे उक्ता सरणिः, प्रभाकरेण सह कथासंगरे तु तत्पुरुषीयतत्प्रवृत्ति ( पुरोवर्तिशुक्तिविशेष्यकप्रवृत्ति ) जनकज्ञानविषयरजतत्वं तादृशज्ञानात्मकं न वेति विप्रतिपाद्यम्, मा नाम चुम्बि भ्रान्त्या प्रभाकरः, भेदाग्रहीति तु प्रवृत्तिजननीपदे सोऽभ्युपैत्येव । तथा च निषेधकोटिरपि न पूर्वाभिहितदूषणालिङ्गिता, ज्ञानभेदस्यैव तत्र साध्यत्वात् ।

अथ असत्संसर्गख्याति विप्रतिपत्तिः ।

असत्ख्यातिर्द्विधा, केचित् संसर्गांशे एवासत्त्वं प्रतिपेदिरे अपरांशे सत्त्वमेव, माध्यमिकास्तु सर्वांशे एवासत्त्वमन्वमिन्वत । तत्र पूर्वस्यां विप्रतिपत्तिः, असत्तादात्म्यविषयकमिदं रजतमिति ज्ञानं स्वातिरिक्तप्रमेयालम्बनं न वा । अत्र विधिरसत्संसर्गख्याति-

मभ्युपगच्छतः, निषेधश्च विज्ञानवादिनः । ननु पक्षे तादात्म्ये-ऽसत्त्वं किमात्मकं प्रवेशि, अलीकत्वात्मकं तु न निवेश्यम् । असत्संसर्गख्यातिवादिना तादृशस्यैवासत्त्वस्य भानस्वीकारेऽपि बहिष्ट्वातिरिक्तस्य ज्ञानाकारतामनालम्बिना तादात्म्यस्य ज्ञानाकारत्वमुपगन्तव्यम् न त्वलीकत्वं, ज्ञानाकारस्यापि चालीकत्वे बहिष्ट्वाबहिष्ट्वयोरलीकत्वानलीकत्वकृतो विशेषः स्वदर्शनसिद्धो बाध्येत, असत्ख्यातिपर्यवसायिता च न शक्यवारणा भवेत्, पक्षतावच्छेदकैक्यं चोभाभ्यां वादिप्रतिवादिभ्यामनुरोद्धव्य-मेवेति असत्संसर्गभानं भणता च ज्ञानाकारतानङ्गीकाराद् न तादृप्येण परिभाषितमप्यसत्त्वं निवेशार्हम् इति चेत्,

अलीकत्वमेवासत्त्वं निवेश्यम् । तच्च विज्ञानवादिना यथेदन्त्वे बहिष्ट्वे च प्रतीयमानेऽपि स्वीकृतं ज्ञाने इदन्तायाः बहिष्ट्वस्य वाऽभावात्तथा तुल्ययुक्त्या ज्ञाने इदन्तादात्म्यस्या-प्यभावात् ज्ञाने इदन्तादात्म्यमलीकमेवाभ्युपगमनीयम् । तथाचा-सत्तादात्म्यविषयकं पक्षीभूतं ज्ञानमुभयोः प्रसिद्धमिति न दोषः । अलीकत्वं च केवलान्वय्यत्यन्ताभावप्रतियोगित्वे सति उत्पत्त्या-दिशून्यत्वं, सत्यन्तस्य वेदान्तिनां घटादिसाधारण्यात् विशेष्य-दलम्, तावन्मात्रोक्तौ तेषां ब्रह्मण्यतिव्याप्तिरतो विशेषणदलम्, तैर्नैयायिकैरिव विभावपि केवलान्वय्यत्यन्ताभावप्रतियोगित्वं नाभ्युपागमि, ब्रह्मभिन्नत्वे सतीति तु लघीयः, तथापि नैयायिकानां गगनादिष्वतिव्याप्तिः; अतो गुणानाश्रयत्वे सति अभावत्वा-नाश्रयत्वमपि देयम्, तेनाश्रयनाशजन्याश्रितध्वंसेऽपि नातिव्याप्तिः।

नित्यद्रव्यभिन्नत्वे सति आश्रयनाशजन्यध्वंसभिन्नत्वं प्रतियोगिनि विशेषणं यद्यपि दीयेत, नित्यद्रव्याभावस्य केवलान्वयित्वेन सत्यन्तेन तत्प्रतियोगिनो नित्यस्य व्यावर्तनात्; तथापि बौद्धानां नित्यस्यैवाप्रसिद्ध्या तद्घटितं विशेषणमप्रसिद्धं

स्यादिति । नैयायिकाद्यभिमतनित्यभिन्नत्वे सतीत्येवं तु दातुं शक्यते ॥

वस्तुतस्तु गगनादीनां केवलान्वय्यत्यन्ताभावप्रतियोगित्वं न युक्तिसहम् । तदन्तरेण कस्याश्चिदनुपपत्तेरभावात्, इह गगनं नास्तीत्यप्रतीतेश्च; गगनादि तादृशात्यन्ताभावप्रतियोगि, वृत्तिनियामकसंयोगाप्रतियोगित्वादित्याद्यनुमानानामनुकूलतर्कविधुरतयाऽसाधकत्वादिति केवलान्वय्यत्यन्ताभावप्रतियोगत्वे सत्युत्पत्त्यादिशून्यत्वमेवालीकत्वमवद्याचुम्बितम् । विज्ञानवादिनाऽसत्संसर्गभानवादिना च सत्त्वेन यदभ्युपगतं तद्भिन्नत्वे नानुगमय्यार्थक्रियाकारित्वशून्यत्वरूपेण वा पक्षेऽसत्त्वं शक्यप्रवेशमिति बोध्यम् । स्वशब्दस्य समभिव्याहृतपरत्वाच्च पक्षीभूतज्ञानातिरिक्तं स्वपदेनादाय विधिकोटौ सिद्धसाधनं योगाचारेण निषेधकोटौ बाधश्च न दातुं पार्यते ।

व्यासज्यवृत्तिधर्मावच्छिन्नस्वप्रतियोगिकभेदं स्वस्मिन्नादाय विधिकोटौ सिद्धसाधनम्, निषेधे च बाधः सम्भाव्यते इति व्यासज्यवृत्त्यनवच्छिन्नत्वं तद्व्यक्तित्वपर्याप्तावच्छेदकताकप्रतियोगिताकत्वं वा भेदे निवेश्यम्, तथा च केवलान्वय्यत्यन्ताभावप्रतियोगित्वविशिष्टोत्पत्त्यादिशून्यतादात्म्यविषयताकमिदं रजतमितिज्ञानं व्यासज्यवृत्तिधर्मानवच्छिन्नस्वप्रतियोगिताकभेदविशिष्टप्रमेयविषयताकं नवेति फलितम्, प्रभाकरमते च तादात्म्यानवगाहनात् न तेन सहैषा विप्रतिपत्तिरिति बोध्यम् पक्षीभूतज्ञानातिरिक्तप्रमेयालम्बनत्वं अन्यस्मिन्ज्ञाने प्रसिद्धम् । निषेधश्चानालम्बने बहिष्ट्वादौ प्रसिद्ध इति ।

अथ सर्वासत्ख्यातिविप्रतिपत्तिः ।

सर्वांशेऽसत्त्वस्वीकर्तृ विप्रतिपत्तिस्तु इदं रजतमिति ज्ञान-

प्रसन्मात्रविषयकं नवेति, विधिनिषेधौ शशशृङ्गादिज्ञानघटादिज्ञानयोः प्रसिद्धौ इति कश्चित् तन्न विकल्पवृत्तेः सर्वैरनङ्गीकारात् शशशृङ्गादिज्ञानस्य संसर्गांश एवासद्विषयकत्वस्य वक्तुंशक्यत्वात्, माध्यमिकनये घटादिज्ञानस्याप्यसद्विषयकत्वाच्च । असत्त्वं ज्ञानविषयतासमनियतं नवेति तु न्यायः ज्ञानविषयतायामभिधेयत्वादौच विधेः, घटत्वादौ च निषेधस्य प्रसिद्धेः ।

अथ सत्ख्यातिविप्रतिपत्तिः ।

भ्रमस्य सन्मात्रविषयकत्वमते भ्रमविषयत्वं प्रमाविषयत्वव्याप्यं नवेति । यत्क्वचित् प्रमितं तदेवान्यत्र भ्रांतिविषयतया भासते इति सन्मात्रविषयतावादिनः । भावो घटत्वादौ, अभावश्च गगनादौ प्रसिद्धः, गगनस्यावृत्तेः सामानाधिकरण्यरूपव्याप्त्यनाश्रितत्वात् गगनादेरपि जनिमुपगन्तृणामतएव तेषां वृत्तिमत्त्वं स्वीकुर्वतां ब्रह्मवादिनां मते गगनादेर्व्याप्तिमत्त्वसम्भवेऽपि शशशृङ्गादौ निषेधप्रसिद्धिर्मन्तव्या. भ्रमस्य चासत्वादिप्रवृत्तिजनकज्ञानत्वेन निवेशेऽस्याः विप्रतिपत्तेः प्राभाकरेण सह विवादेप्युपयोगः ।

अथाख्यात्यन्यथाख्यातिविप्रतिपत्तिः ।

अख्यात्यन्यथाख्यातिवादिनोर्विवादे, "ज्ञानत्वं विशेष्यावृत्तिप्रकारकवृत्ति नवा" शुक्तौ रजतत्वं समवायेन, रजतं वा तादात्म्येनावर्तमानमपि प्रकारतया भासते इत्यन्यथाख्यातिवादिनो नैयायिका भट्टादयश्च विधिकोटिमालम्बन्ते, निषेधस्तु प्राभाकरैः सर्वप्रत्यययाथार्थ्यवादिभिः भगवद्रामानुजादिभिश्चाश्रीयते । तत्र भावो भेदाग्रहजन्यायां प्रभाकरेणापि विशेष्यावृत्तिप्रकारताकत्वेनोपगतायामिच्छायां निष्फलप्रवृत्तिजनन्यां वर्तमाने इच्छात्वे प्रसिद्धः । अभावस्तु प्रमात्वे इति विवेकः ।

प्रकाराणामवृत्तित्व सिद्धिमादायार्थान्तरं मा भूदतः प्रकारेषु शुक्ति-मत्त्व विशेषणं प्रक्षेप्यम् ।

विशेषतोऽपि—

रजतेच्छाजन्यशुक्तिविषयकप्रवृत्ति जनकं रजतज्ञानं शुक्ति विषयकं न वा ।

तादृशं पुरोवर्तिविशेष्यकं ज्ञानं रजतत्वप्रकारकं न वा ।

पुरोवर्तिविषयकरजतविषयकज्ञानयोः प्रभाकरेण पृथक्तया स्वीकृतयोः प्रत्येकं भिन्नत्वेनागृहीतयोः प्रवर्तकयोः पुरोवर्तिविषयकं न रजतत्वप्रकारकं, रजतविषयकं च न शुक्तिविषयकमिति निषेधः प्राभाकरीयः । विधिस्तु नैयायिकादीनां, तैः पुरोवर्तिरजतविषयकैकज्ञानाभ्युपगमात्, ततश्च रजतज्ञाने शुक्तिविषयकत्वसिद्धिरनुभवैक्ये पर्यवस्यति, एवंशुक्तिज्ञाने रजतविषयकत्वसिद्धिरपि ।

प्रथमायां विमतौ तादृशप्रवृत्तिजनकं ज्ञानं प्रभाकरमते स्मृतिः, नैयायिकादिमते च विशिष्टानुभवः, तथा च स्मृतेः पक्षत्वे नैयायिकादेर्बाध, विशिष्टानुभवस्य तत्त्वे गुरुणाऽऽश्रयासिद्धिरुद्भाव्येति विकल्प्यमाने यद्यपि दोषोन्मेषस्तथाप्यवधीर्य तादृशविकल्पकल्पनामुभयमतसाधारणेन तादृशरजतज्ञानत्वेन पक्षतेति न दोषः ।

द्वितीयस्यां विमतौ तु न तादृशशङ्काकलङ्कः—उभयैः पुरोवर्तिविषयकानुभूतेरेवोपगमात् । युक्तं च मतद्वयसाधारण्येन पक्षत्वं-नोचेत् निर्वह्निः पर्वतः पक्षः, सवह्निर्वा—आद्ये बाधोऽपरत्र सिद्धसाधनमिति पक्षतोच्छेदादनुमितिमात्रोच्छेदः कथमुच्छेद्यः ।

### अथानिर्वाच्यख्यातिविप्रतिपत्तिः ।

अनिर्वचनीयख्यातौ—ख्यातिनिरुक्तयो दुष्टतानियामकसम्बन्धावच्छिन्नदोषत्वावच्छिन्नाभाववत्यो नवा ।

अत्र ख्यातिशब्देन सर्वाः ख्यातयो ग्रहीतुं शक्यन्ते अख्यातेरपि परीक्षकेषु ख्यातित्वेन व्यवहारात्, परन्तु एकदैकेनैव सह विवादात् विमतेः विशेषे एव पर्यवसानं, अन्यथा ख्यातिनिर्वचनं दोषत्वावच्छिन्नाभाववन्नेति रीत्या, तथाचास्तु अख्यातेर्बहिर्भावो न काचित्क्षतिः। अत्र विधिर्वेदान्तिभिन्नस्य, निषेधश्च वेदान्तिनः। यत्किञ्चिद्दोषाभावस्य वेदान्तिनाऽपि उररीकारात् सामान्याभावनिवेशो विहितः। ननु सामान्यविमतौ अनिर्वचनीयख्यातेरपि पक्षतावच्छेदकाक्रान्तत्वात् तत्र निषेधकोटौ दोषवत्तासाधने कथन्नोपनिपदस्य सिद्धान्तहान्या निग्रह इति चेन्न, चिदतिरिक्तस्य सर्वस्यापि अनिर्वाच्यतामुपगतवतस्तस्या निर्वाच्यख्यातेरपि अनिर्वाच्यत्वादेवोक्तदोषानवकाशात्। न चैवमपि विधिवादिनोऽनिर्वाच्यख्यातिमनभ्युपयतः पक्षतावच्छेदकालिङ्गितायां तस्यां दोषत्वावच्छिन्नाभावसाधनेन परमतानुमतिनिग्रहोति संश्लेषः किमिति नेत्यभिधातव्यम्, अतोऽपि दोषात् विशेषे पर्यवसानस्यैव भणितत्वात्।

वस्तुतस्तु नेयं शङ्काऽपि समुन्मिषति; प्रौढिवादमात्रमस्य सर्वस्यापि ख्यातिजातस्य दोषवैधुर्य्यं साधयतो वेदान्तिमतानुमतिप्रसक्त्यभावात्, नो खलु ते तस्यां (अनिर्वाच्यख्यातौ)दोषराहित्यं जगुः अनिर्वाच्यत्वादेव तस्या अपि। विधिप्रसिद्धिः परस्मिन् ब्रह्मणि, निषेध प्रसिद्धिश्चोभयवादिसम्मते कस्मिंश्चिदुष्टे लक्षणे इति। अन्यसम्बन्धेन दोषाभावमादाय दोषनिवृत्त्यै सम्बन्ध विशेषो निवेशितः।

विमतं ज्ञानं मुख्यविशेष्यातिरिक्तांशे निरुक्तिविषयतावद्विषयकं न वा।

कस्य का कोटिरिति पूर्ववद्, यद्यपि वाङ्मनसागोचरे परस्यां चितौ निरुक्तिविषयताया असम्भवात् तज्ज्ञाने विधिर्न

प्रसिद्धिमर्हति तथापि शून्यवादापत्तिभिया स्वतःसिद्धत्वादिना तस्या अपि निर्वाच्यत्वेनाभ्युपगमात्, रज्जुसर्पः सन्निति ज्ञानमादाय तत्रैव प्रसिद्धिर्बोध्या, असत्त्वेन निर्वाच्यत्वेन असत्त्वप्रकारकनिरूपितविशेष्यत्वेनाभ्युपगते तुच्छेऽपि प्रसिद्धिः सुलभा, विमतज्ञानविषये सत्त्वप्रकारकनिरूपितविषयताऽभावमभ्युपगच्छता सह विवादे ऽसत्त्वप्रकारकनिरुक्तिविषयतावद्विषयकत्वाभावमात्रं साध्यं;

असत्त्वप्रकारकनिरूपितविषयतावद्विषयकत्वाभावं स्वीकुर्वता च सह विवादे सत्त्वप्रकारकनिरूपितविषयतावद्विषयकत्वाभावमात्रं साध्यं, तावतैव वेदान्तिनोऽभीष्टसिद्धेः, तथा च निषेधप्रसिद्धिरपि न दुर्लभा, पूर्वस्मिन्साध्ये शून्यतादिज्ञाने ब्रह्मज्ञाने च मतभेदेन साध्यप्रसिद्धिः, बौद्धैरपि शून्यतायाः पारमार्थिकत्वाभ्युपगमात् तस्या असत्त्वप्रकारकनिरूपितविषयत्वाभावात्। उत्तरस्मिन् साध्ये तु तुच्छज्ञाने प्रसिद्धिर्बोध्या, सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति नियतेर्जागरूकत्वेऽपि वेदान्तिना विशेष्यांशस्येदमादेरपि अनिर्वाच्यत्वाभ्युपगमान्न विधौ सिद्धसाधनं नापि निषेधे बाधः।

ननु "सर्वप्रत्ययवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते" इति भणितिमुल्लासयता श्रुत्यन्तानुसारिणा कथं नाम न विधौ सिद्धसाधनं देयम्, निषेधे च कथं न बाधो, निर्वाच्यब्रह्मणो विषयत्वात् इति चेन्मैवम्, सर्वस्मिन्नंशे निरूपितविषयविषयकत्वस्य विधौ, तदभावस्य चापरकोटौ साधने उक्तशङ्काकलङ्काप्रसरादिति।

एवं विप्रतिपत्त्यन्तरम्

देवदत्ताज्ञानविषयतावच्छेदकत्वं देवदत्तासंवादिप्रवृत्तिजनकज्ञाननिष्ठविषयितानिरूपितमुख्यविशेष्यताऽनिरूपितप्रकारताश्रयवृत्त्यत्यन्ताभावप्रतियोगि न वा। प्रतीतिमात्रजीवनं

शुक्तौ भासमानं रजतादि न ज्ञानात्पूर्वं क्वापि वर्तते किन्तु ज्ञातसत्ताकमेवेति वदतां वेदान्तिनां विधिः, निषेधश्च तदतिरिक्तानाम्।

अत्र यद्यपि-अज्ञातत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि न वेत्युक्तौ अज्ञातत्वाभावो ज्ञातत्वं भूतकालिकज्ञानविषयत्वं, तस्य च भूयस्सु विषयेषु सर्वमते सत्वेऽपि न सिद्धसाधनं भावरूपाज्ञानस्य साधनात्, तद्विषयत्वाभावस्य च वेदान्त्यतिरिक्तेन केनापि भ्रमविषयेषु रजतादिषु अस्वीकारात्, सुखादावपि न सिद्धसाधनं नैयायिकादिभिस्तेषां मानसप्रत्यक्षाभ्युपगमात् प्रत्यक्षं प्रति विषयस्य कारणत्वात् पूर्वं सत्ताया अवश्यमभ्युपगन्तव्यतयाऽज्ञाततया तेषां सत्त्वावश्यम्भावात्, तथाप्येतावता वेदान्तिनो न किमपि अभिलषितं सिध्यति, ब्रह्मण्येवाज्ञानविषयतायास्तेनाङ्गीकारात् अन्यत्र सर्वत्र तदभावस्य तन्मते सत्त्वेन प्रातीतिक एवाज्ञातसत्ताकत्वस्य विश्रान्तेरतोऽज्ञानविषयतावच्छेदकत्वं पक्षितम् तस्य च व्यावहारिक एव सत्त्वात्, तदत्यन्ताभावः प्रातीतिके सिद्ध्यन वेदान्त्यभिलषितं पूरयितुं चेष्टते तथापि न पूरयति असतश्चिदनवच्छेदकत्वेन तदवच्छिन्नचितौ अज्ञाततया असत्त्वेनासतो ज्ञानविषयतावच्छेदकत्वाभावात् तत्र पक्षाभावसत्त्वेनार्थान्तरतापत्तेरतो भ्रमविषयस्यैवात्यन्ताभावानुयोगित्वेन निवेशावश्यकत्वाद् भ्रमविषयत्वेन च निवेशे प्रकारस्याप्रसिद्धे रसंवादिप्रवृत्तिजनकत्वेन भ्रमं निवेश्य तदीयविषयस्यात्यन्ताभावानुयोगित्वेन निवेशः,

अन्यपुरुषीयाज्ञानविषयतावच्छेदकत्वस्यान्यपुरुषीयभ्रमविषयेऽभावमादायार्थान्तरता माभूदिति पक्षे साध्ये च पुरुषविशेषो न्यवेशि। सर्वं ज्ञानं धर्मिण्यभ्रान्तमितिरीत्या विशेष्यस्येदमादेर्व्यावहारिकत्वेन च तदवच्छिन्नचिति अज्ञातत्वसत्त्वात् तस्याज्ञानविषयतावच्छेदकत्वात्, भ्रमविषयत्वाच्च, तत्र पक्षाभावसाधने बाधात् तद्व्यावृत्त्यर्थं विषयताश्रयेत्यनुक्त्वा प्रकारताश्रयेत्यवाचि, प्रकारता

या इदन्त्वेऽपि सत्त्वात् तस्य च व्यावहारिकतयाऽज्ञानविषयतावच्छेदकत्वसम्भवात्मा भङ्गु बाधोऽतो मुख्यविशेष्यताऽनिरूपितप्रकारताश्रयस्यात्यन्ताभावानुयोगितया निवेशः, तथा च सति प्रकारताऽसमानाधिकरणविशेष्यताया एव मुख्यतया इदमश्च ववाप्यप्रकारत्वाद् मुख्यविशेष्यतायास्तत्रैव वर्तमानतया रजते विशेष्यताया रजतत्वनिष्ठप्रकारतानिरूपितायाः सत्त्वेऽपि तादात्म्यसम्बन्धावच्छिन्नेदन्त्वनिष्ठविशेष्यतानिरूपितप्रकारताया अपि सत्त्वेन प्रकारतासमानाधिकरणतया मुख्यत्वाभावाद् मुख्यविशेष्यतानिरूपितप्रकारताया अधुनेदन्त्व एव सत्त्वेन मुख्यविशेष्यताऽनिरूपितप्रकारतायास्तत्राभावात् तद्वारणात् ।

इदं सर्वं "इदं रजतमिति" विशेषाकारं ज्ञानं साध्ये प्रवेश्यैव वक्तुं शक्यते न तु रजतमिदमिति ज्ञानं, तथा सति रजतस्यैव मुख्यविशेष्यताश्रयत्वेन तदनिरूपितप्रकारताया इदन्त्वे सत्त्वेन तत्राज्ञानविषयतावच्छेदकत्वाभावस्यानिष्टस्य सिद्ध्यापत्त्या बाधोवाऽर्थान्तरं वा भवेत् ।

ननु प्रभाकरसङ्ग्रहोपायं नोपलभामहे, असंवादिप्रवृत्तिजनकत्वेन सङ्गृह्यतां तदभिमते ज्ञाने, ननु ज्ञानं, विषयतानां निरूप्यनिरूपकभावो हि सति ज्ञानैक्ये समस्ति न तु ज्ञानद्वैते, उररीचक्रे च तेन ज्ञानद्वयं ग्रहणस्मृत्यात्मकं, तथा च ज्ञानद्वयीमुख्यविशेष्यते इदमि रजते च वर्तेते, इदन्त्वे रजतत्वे च मुख्यविशेष्यतानिरूपितप्रकारते, इति मुख्यविशेष्यताऽनिरूपितप्रकारत एव न प्रसिद्धिपथमधिरोहत इति कथमेषा विप्रतिपत्तिस्तेन सह कथायामुपयुज्यतामिति चेद् मोपयुज्यत, पूर्वाभिहितविप्रतिपत्तय एवोपयोक्ष्यन्ते, ज्ञानैक्यं वदद्भिः साकमेवैषा कथायां साफल्यमावहयति, तथा च भ्रमत्वेनैव भ्रमो निवेश्यते ।

ननु वेदान्तिभिरेव ज्ञानैक्यं न स्वीक्रियते, इदमि हि मनो-

वृत्तिविषयतामाचक्षते ते. ब्रुवते च रजतेऽविद्यावृत्तिविषयता-मित्यभिहितदोषोन्मेषात् नैषा विमतिः सुधीधीपद्धतिमध्यास्त इति चेत्कथमेतत्। नो खलु ते प्रभाकरैः सम्मन्यते, आरोपं समर्थयमाना हि तेषां वाचोभङ्ग्यो विलसन्ति, ज्ञानद्वयीमालम्बमाना अपि ते ज्ञानयोरध्यासमभ्युपगत्य ज्ञानयोस्तादात्म्यप्रतीतिमेव प्रवर्तकता-पदेऽभिषिञ्चन्ति, अमुमेव च ज्ञानाध्यासमभिलषन्ति, तस्मादना-विलैवासौ।

ननु बाधग्रहकाले रजतादौ पक्षासत्त्वमादायार्थान्तरता पि-शाची पृष्ठारूढैवेतिचेत् कदाचिदपि तत्र सतोऽज्ञानविषयतावच्छे-दकत्वस्य त्रैकालिकतन्निष्ठात्यन्ताभावाप्रतियोगित्वात्, अर्थान्त-रतां ददानस्य निरनुयोज्यानुयोगापत्तेः, तत्र भवति च न भवति चेति व्याहतम्। अतएवाव्याप्यवृत्त्यत्यन्ताभावमादाय अनुमानस्य कृतार्थतयाऽर्थान्तरतेति पराहतम्। तस्य प्रमाणागोचरत्वात् संयोगाभावादिस्थलेऽवच्छेदकभेदेन वृक्षस्य भेदसम्भवात्। यदाहुः

"अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टयोर्द्वयोः।
घटते न यदैकता तदा सुतरां तद्विपरीतरूपयोः॥" इति॥

कुण्डली—अस्त्री देवदत्त इत्यत्रापि यदा तत्तद्विशेषणालिङ्गि-तस्य देवदत्तस्य भेदः, तदा भावाभावादिस्थले तु कैमुतिकन्याया-गतो भेद इति भावः।

अतएव पूर्वं घटाधिकरणे पुनश्च तदपनयानन्तरं तदधि-करणे तदत्यन्ताभाव इति निरस्तम्। प्रतियोगिसमानाधिकरणे-ऽप्यत्यन्ताभावत्वमिति रुचिप्रमाणकमेव भवेत्। यदाह वर्धमानः कुसुमाञ्जलिप्रकाशे, क्लृप्तसंसर्गाभाववैधर्म्येऽपि अबाधितप्रती-तिबलात् उक्तस्थलेषु सामयिक एवाभावस्तुरीय उपगन्तव्यः, यदि च क्लृप्तविशेषाणां बाधात् सामान्यमभावत्वमपि तत्र स्थातुं नोत्सहते इति गद्यते, तदा संसर्गाभावद्वयेन सादित्वरूपवैधर्म्याद

ध्वंसोऽपि न प्राणान् धारयितुं क्षमेतेति प्रतिवन्द्या स्थातव्यम्। यदि चाबाधितधं सविशेषप्रतीतिरेव विशेषमनादायापर्यवस्यन्ती सामान्यं बलादानयति । तर्हि प्रकृतेऽपि क्वचन संसर्गाभाववैलक्षण्येऽपि सामयिकोऽभाव एवेतितुल्यम् । तदेतदर्थतोऽपाठि ।

यदि चोक्तस्थलेषु अत्यन्ताभाव एवेत्याग्रहः तत्तज्ज्ञानकालीनसम्बन्धेन च प्रतियोग्यसामानाधिकरण्यमपि न दुष्यति तदा प्रकृतेऽपि सम्बन्धविशेषमन्त्रेणैवाथान्तिरतापिशाची उत्सारणीया, तथा च देवदत्तज्ञानविषयतावच्छेदकत्वं देवदत्तभ्रान्तीयमुख्यविशेष्यतानिरूपितप्रकारताश्रयनिरूपितसम्बन्धविशेषावच्छिन्नवृत्तिताकात्यन्ताभावप्रतियोगितावन्न वेति फलितम्।

सदसत्ख्यातिविप्रतिपत्तिः ।

सद्भेदासद्भेदौ किञ्चिदिष्टव्यासज्यवृत्तिधर्मानवच्छिन्नात्यन्ताभावप्रतियोगिनौ नवा । विधिर्वेदान्त्येकदेशिनामनिर्वाच्यवादिनां नागेशादीनाम्, निषेधस्तु वेदान्त्यादीनाम्। ब्रह्मणि तुच्छे च सदसद्भेदयोरुभयत्वावच्छिन्नात्यन्ताभावसत्त्वात् विधौ सिद्धसाधनं, निषेधे च बाधो मा भूदिति व्यासज्यवृत्तिधर्मानवच्छिन्नत्वमभावे व्यशेषि । एवं च ब्रह्मतुच्छभिन्ने जगति प्रातिभासिके व्यावहारिके च सदसद्भेदत्वं पर्यवस्यति, इदमेवानिर्वाच्यत्वं । अधिष्ठानगतसत्त्वस्य बहिरनुपदेऽप्यस्त्येव बुद्धिरिति शुक्तिरजतादौ समारोपः। अविद्ययाऽपरोक्षज्ञानोत्पत्त्यैव रजतादेरपरोक्षतोपपत्तौ जनिस्वीकारे गौरवमिति तदाशयः ।

एवं विप्रतिपत्त्यन्तरमपि-

रजतत्वविशिष्टं तादात्म्यसम्बन्धेन रजतत्वविशिष्टसम्बन्धितया ज्ञायमानप्रतियोगिकवैशिष्ट्यसंसर्गाभावीयतादात्म्यसम्बन्धावच्छिन्नरजतत्वावच्छिन्नप्रतियोगिताविशिष्टं न वा ।

विधिर्वेदान्तिनः, रजतत्वावच्छिन्नप्रतियोगिताकघटाभावे प्रसिद्धिः, प्रातीतिकव्यवहारिकसाधारणरजतादौ अनिर्वाच्यत्व-सिद्ध्यर्थं चैषा विप्रतिपत्तिरितिबोध्यम् ।

रजतत्वं स्वावच्छिन्नवत्त्वेन प्रतीयमानयावन्निष्ठाभावीयत्व, स्वावच्छिन्नत्वेतिसम्बन्धद्वयेन स्वविशिष्टप्रतियोगितासमानाधिक-रणं नवेतितु पूर्वस्यैव चिट्टलेशीयो निष्कर्षः ।

तत्र प्रथमसम्बन्धानुक्तौ रजतानधिकरणे रजतत्वावच्छि-न्नाभावसत्त्वात्सिद्धसाधनं, द्वितीयसम्बन्धानुक्तौ च घटत्वेन रजताभावमादाय सिद्धसाधनमिति सम्बन्धद्वयोपादानम्—

नच प्रातीतिकरजतत्वेन व्यावहारिकरजताभावमादाय सिद्धसाधनव्युदासाय स्वसामानाधिकरण्यसम्बन्धोऽपि देय इति शङ्क्यम् प्रातीतिकव्यावहारिकोभयसाधारणरजतत्वस्वीकारेणैव प्रातीतिकेऽपि प्रवृत्त्याद्युपपत्त्या प्रातीतिकरजतत्वस्य शशविषा-णायमानत्वात् । प्रत्युतोक्तसम्बन्धस्य दाने साध्यप्रसिद्धेर्दुर्लभ-त्वापत्तेः । नचोभयसाधारणरजतत्वस्वीकारे प्रातीतिकरजते-नापि कटकादिर्निर्मीयेतेतिवाच्यम् फलबलेन व्यावहारिकत्व-विशिष्टस्यैव रजतस्य कारणत्वं कटकादिनिरूपितं कल्प्यते, प्रातीतिके च व्यावहारिकत्वाभावान्न दोषः ।

इति विप्रतिपत्तयः ।

# अथ साकारख्यातिनिरूपणम् ।

अस्ति तावद्विज्ञानं स्वप्रकाशं, कदाचिदपि संशयाद्यगोचरत्वात्, नो खलु घटोऽस्वप्रकाशः कदाचिदपि संशयाद्यगोचरः, तथा च स्वप्रकाशत्वं विनानुपपन्नं जिज्ञास्यत्वेऽसत्यपि संशयाद्यगोचरत्वं तदनाक्षिप्य न शाम्यति, अनुव्यवसायधाराविश्रान्तेः सुषुप्त्याद्यभावप्रसङ्गेनावश्याभ्युपगन्तव्यत्वेन नानुव्यवसायमभ्युपगत्यापि उक्तो हेतुः शक्योपपाद इत्यन्यत्र विस्तरः । तथा च शुक्तौ जायमानमिदं रजतमिति ज्ञानमपि स्वात्मानमेव प्रकाशयेत् नत्वतिरिच्यामानमपि स्वापेक्षया, नहि घटे भासमाने पटो नियमेन भासते, भासमाने चेदं रजतमिति ज्ञाने रजतं नियमेन भासमानं तदात्मकमेव भवेत्, नोचेद् घटादिभिः किमपराद्धं, ते तत्र किमिति न भासेरन्, इदं रजतमिति ज्ञानेन साकं रजतस्य घटाद्यपेक्षया सम्बन्धविशेषानाकलनात् । संविज्जनकत्वं हि विषयत्वं तच्च रजते विशेषसम्बन्धो, न घटादाविति चेत् नूनमिन्द्रियमपि संविदं जनयत् विषयतयैव वाञ्छसि किम्, तस्मादतिव्यापकोऽयं सम्बन्धो न रजतभाननियामकः, परोक्षस्थले च किं कुर्याः, नहि तत्र विषयस्य जनकत्वम् । यानुमितिर्वह्निनिरूपितव्याप्त्याश्रयविषयकपरामर्शजन्या सा तद्विषयिकेत्याद्यननुगतमेव नियामकं वाच्यमिति चेत् पक्षो न विषयः स्यात् । तद्विषयता नैव स्वीक्रियते इति चेत्, एवं तर्हि धूमहेतुकानुमितौ वह्निसंयोगालोकादीनामपि विषयतापत्तिः, धूमस्य तन्निरूपितव्याप्त्याश्रयत्वात् । याऽनुमितिः

स्वहेतुभूतपरामर्शविषयव्याप्तिनिरूपितव्याप्तीत्यादिकर्तेऽशत आत्माश्रयः, कारणतावच्छेदककोटौ कार्यस्य निवेशादिति रजतस्यैव तत्र ज्ञाने भासमाने भाने किन्नाम नियामकं भवेदन्यदतोऽभेदात्। रजतमहं जानामीति तु प्रत्ययत्रयं नत्वेकोऽयं प्रत्ययः, येन तद्बलेन ग्राह्यग्राहकभावस्तयोः समर्थ्येत।

यदि च स्थायित्वं भवेत्, अभ्युपगम्येतापि ज्ञानक्रियानिमित्तो विषयविषयिणोः सम्बन्धः—तत्तु न विचारसहम्, स्थिरं हि उत्पद्यमानं समर्थं वाऽसमर्थं वा नश्वरं वाऽविनश्वरं वा उत्पद्येत, न प्रथमः, समर्थस्य कालक्षेपायोगात् युगपदेव सर्वं कर्तव्यं कुर्यादेव, समर्थस्वभावस्य च सहकार्यपेक्षावाचोयुक्तेरुपहासास्पदत्वात्, सहकारिभिरतिशयानाधाने तेषां वैयर्थ्यात्, अतिशयाधाने तु विरुद्धधर्माध्यासेन सातिशयस्य नूतनस्यैवोत्पत्तेः सिद्धः क्षणभङ्गः, असमर्थस्वभावं त्वपेक्ष्यापि न कुर्यात्, यदि नश्वरं तर्हि नाशस्वभावत्वादेव प्रतिक्षणं नश्येदिति मच्चरणशरणेन रक्षितोसि, चतुर्थे तु न कदापि नश्येद् गगनादिवत्, तस्मात् "कुशूलस्थं वीजं यद्यङ्कुरसमर्थं स्यात्, अङ्कुरं जनयेत्, न जनयति तस्मान्न समर्थम्" इति प्रसङ्गविपर्ययाभ्याम्, एवं "क्षेत्रपतितं यद्यसमर्थं भवेन्नाङ्कुरं भावयेत्, भावयति तु तस्मान्नासमर्थ" मिति प्रसङ्गविपर्ययाभ्यां च कुशूलक्षेत्रस्थयोर्भेद इति क्षणिकत्वसिद्धिः।

सति च क्षणिकत्वे जानातिक्रियानिमित्तो न विषयविषयिसम्बन्धो निरूपणार्हः, नो खलु क्षणिकस्य क्रियोत्पत्त्यतिरिक्ता सम्भविनी नाम, तस्मादन्यस्य सम्बन्धस्याशक्यनिरूपणत्वे स्वाभाविकोऽभेद एव सम्बन्धोऽभ्युदयः, नो चेत् कथमपि रजतादेर्भानं न स्यात्, नहि तद्भानार्थं ज्ञानाभेदं विनाऽन्या गतिरस्ति। अतो रजतादेःप्रतिभा ...भानुपपत्तिरेव तस्य

संविदोऽभेदमाक्षिपति, यदाहुः—"प्रमाणवत्त्वादायातः प्रवाहः केन वार्यते।"

"अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टवैमत्यं सैव सर्वबलाधिका॥"

सेयमर्थापत्तिरस्मन्मतेऽनुमानमेव। "सहोपलम्भनियमादभेदो नीलतद्धियोः।" तदेतत्संगृहीतं वृद्धैः—

"स्वप्नधीसाम्यतो बुद्धेर्बुद्ध्यार्थस्य सहेक्षणात्।
तद्भेदेनानिरूप्यत्वात्, ज्ञानाकारोऽर्थ इष्यताम्॥" इति

जाग्रत्प्रत्ययाः निरालम्बनाः—स्वांशातिरिक्तालम्बनशून्याः प्रत्ययत्वात् स्वप्नप्रत्ययवत्। अर्थत्वेनाभिमतो बुद्धेरभिन्नः, नियमेन तया सहैवोपलभ्यमानत्वात् यद्येन सह नियमेनोपलभ्यते तत्तेनाभिन्नं यथैकेन चन्द्रमसा सह नियमेनोपलभ्यमानोऽपरश्चन्द्रस्तेनाभिन्नः।

विमतं ज्ञानाभिन्नं ज्ञानभेदेनानिरूप्यत्वात् ज्ञानवत्, बौद्धमते स्थित्वापि उदाहरणोपनयातिरिक्तावयवप्रयोग एतन्मार्गक्षुण्णत्वहेतुक एव। ज्ञानभेदेनानिरूप्यत्वञ्च साध्यं, तथाहि, ज्ञानभिन्नत्वे हि कोऽयं पटः? न तन्त्वतिरिक्तः, नहि तदतिरिक्ततया गौरिवाश्वातिरिक्ततया प्रतीयते, एवं तन्तवोऽपि नांश्वतिरिक्ततया प्रथन्ते, एवमंशवोपि स्वावयवातिरिक्ततया, तस्मात् पट इति, तन्तव इति, अंशुरिति सर्वापि धीर्मृषैव। तदेवमापरमाणु सर्वेष्वपि पदार्थेषु निरूप्यमाणेषु याथात्म्याप्रतीतेर्न स्थविष्ठो न स्थूलो न क्षुद्रो न क्षोदिष्ठो वाऽस्ति पदार्थभेद इति सर्वा धियोऽबाह्यमपि स्वस्वरूपं बहिष्ठेन विषयीकुर्वत्यो भ्रान्तिरूपतामेवालम्बन्ते, तदुक्तम्—

बुद्ध्या विविच्यमानानां स्वभावो नाऽवधार्यते।
अतोनिरभिलप्यास्ते निस्स्वभावाश्च देशिताः॥

निस्स्वभावाइति ज्ञानातिरिक्तस्वभावशून्याः । बाह्यहेतुशून्यत्वेऽपि च स्वप्नादिष्विव वासनावैचित्र्यनिबन्धनमेव विज्ञानवैचित्र्यमुपपत्स्यते ।

अपि च विज्ञानविषयतयाऽभिमतो बाह्यो न परमाणुः, स्थौल्यमवगाहमाना धीः कथमिव परमाणुमालम्बेत, यदि चेदं स्थौल्यं ज्ञानस्यैव धर्मः, तदा न विवदामहे, यदि ज्ञानकाले रूपपरमाणूनामेव निरन्तरमुत्पन्नानामेकज्ञानविषयतामापन्नानां स्थौल्यं धर्मः, परमाणूनां प्रत्येकं सूक्ष्मत्वेऽपि सांवृतं स्थौल्यं प्रतीतिगोचर इत्युच्यते, तदापि गन्धादिपरमाणुभिरन्तरितत्वात् नैरन्तर्यविभासस्य भ्रान्तित्वं न शक्यवारणम्, तस्माद्बाह्यस्य परमाणुत्वे प्रत्यक्षप्रमाणगम्यता न शक्यसमर्थनेति । यदि च बाह्योऽर्थोऽभ्युपगम्यते परमाणुसमूहस्तदाऽपि परमाणुभ्योऽभेदे पूर्वाभिहितदोषान्निर्मोक्षो न, भेदे च गवाश्वयोरिव तादात्म्यं न भवेत्,समवायस्य चानवस्थादोषग्रस्तत्वात् स्वरूपेण सम्बद्धत्वस्य परिभाषामात्रत्वात् न तमभ्युपगम्यावयवावयव्यादिभावकल्पनयाऽपि निस्तारः, अवयविखण्डनयुक्तयश्चात्रोद्घोषणीया ।

अवयवी व्यासज्यावयवेषु वर्तते, अव्यासज्य वा, आद्ये यावदवयवप्रत्यक्षतां विना तत्प्रत्यक्षता न स्यात्, नहि घटद्वयप्रत्यक्षं विना तद्गतं द्वित्वं व्यासज्यवृत्ति प्रत्यक्षं भवति । अव्यासज्य तत्तदवयवेषु वर्तने पुच्छेनापि स्तनकार्यं कुर्यादेवेति रीत्याऽवयवी निरसनीयः ।

तस्माद्बाह्यस्य प्रपञ्चस्य ज्ञानानात्मकतया निरूपयितुमशक्यत्वात् प्रमितत्वेनाभ्युपगमविषयस्यापि तस्य ज्ञानात्मकत्व एव स्वीकरणीये भ्रान्तिविषयत्वेनाभ्युपेतानां ज्ञानात्मकतायां किं छिद्यते । बहिष्ट्वकल्पनाया गौरवपराहतत्वात् ।

रजतं संविद्रूपं सम्प्रयोगमन्तरेणापरोक्षत्वात् संविद्वदित्यनुमाऽपि रजतस्य ज्ञानात्मकतायां मानम् । अपि च, अयं घट इति ज्ञानानन्तरं स्मृतिर्जायते ज्ञानविषयेति ज्ञानानुभवोऽपेक्षणीयः, निराकारस्य चास्मरणात् अनुभवोऽपि साकारस्यैव, आकारश्चैकोऽनुभूयते न तु द्वौ, एवं च स आकारो ज्ञानस्य वाऽर्थस्य वेति विचारणायां ज्ञानस्यान्वयव्यतिरेकाभ्यां, बाह्यस्य स्वप्ने व्यभिचारात्, द्विचन्द्रादिबोधस्थले च चन्द्रे द्वित्वबाधात् ज्ञानस्यैव तद्वाच्यम्, एवमेकव्यक्तावपि दारा इति बहुवचनप्रयोगो ज्ञानाकारतां विना न सेद्धुमर्हति ।

ननु यद्यस्त्येव रजतं ज्ञानकारस्तर्हि नेदं रजतमिति सर्वानुभवसिद्धस्य बाधस्य बाधकत्वमाशामोदकायत इति चेत्, मैवम्, इदं रजतमित्यत्र द्वयं प्रतीयते, स्वप्रकाशत्वाज्ज्ञानस्वरूपं, पुरोवर्तिद्रव्यञ्च, रजतत्वमपि तृतीयम्, तत्र नेदं रजतमिति बाधग्रहेण पुरोवर्तिनि रजतत्वे प्रतिषिद्धे सति अर्थात् ज्ञानस्यैव तत्परिशिष्यते, अन्यस्य तत्राविषयत्वात्, अत एवोच्यते–'बाधग्रहस्य रजते इदन्तामात्रनिषेधेनैवोपपत्तौ रजतनिषेधस्यापि तद्विषयत्वे गौरवात् रजतमान्तरमेवावतिष्ठते' इति, नहि बाह्यस्य ज्ञानातिरिक्तस्यासम्भवग्रासे सति अन्यथाख्यात्यादिमतेनान्यदेशस्थस्यात्र प्रतीतिरिति कुकल्पनावकाशः, ज्ञानस्य च सर्वानुभवसिद्धत्वात्तेनैवोपपत्तौ असद्भानकल्पनमपि शशशृङ्गायितम् । तस्मात् विज्ञानमेवानादौ संसारे तत्तदाकारेण वासनावैचित्रीवशंवदीभूय प्रथते इति सिद्धमात्मख्यानमिति ।

इदन्त्ववधेयम्–यद्यपि सौत्रान्तिकवैभाषिकमतग्रन्था विशेषत उपलब्ध्यगोचरास्तथापि ताभ्यामप्यात्मख्यातिरेव स्वीक्रियते भ्रमस्थले, अन्यत्र तु बाह्यं जगत्स्वीक्रियत एव, तदुक्तं वाचस्पतिमिश्रैः–"सौत्रान्तिकनये तावदस्ति बाह्यं वस्तुसत्, तत्र ज्ञानाकार-

स्यारोप" इति। वैभाषिकमतेऽप्येतत्तुल्यमिति कल्पतरुपरिमलादितः प्रतीयते। विशेषस्त्वियान्—अधिष्ठानं शुक्तिशकलादि सौत्रान्तिकनयेऽनुमेयं, वैभाषिकनये तु प्रत्यक्षम्। अध्यस्तं तु ज्ञानाभिन्नत्वात्प्रत्यक्षमेवोभयमते, नागेशेनापि मञ्जूषायां "सौत्रान्तिकनये ज्ञानधर्म एव भासत" इत्युक्तम्, तस्यान्यथाख्यातिवादित्वं परमन्यत्रान्यारोपसाम्याज्जगादेत्यन्यदेतत्।

### अथ साकारख्यातिखण्डनम्।

तदेतन्नानुभूतिपथमवतरतीत्यपरे न चोदन्नमं मन्यन्ते। तथाहि, अत्रानुमानभङ्गः सङ्गृहीतो "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रार्थं विशदयद्भिर्मधुसूदनसरस्वतीभिः—

"बाधेन सोपाधिकताऽनुमाने, उपायभावेन सहोपलम्भः।
सारूप्यतो बुद्धितदर्थभेदः, स्थूलार्थभङ्गे भवतोऽपि तुल्यः" ॥इति॥

भवतु तावद्विज्ञानं स्वप्रकाशं तच्चास्माभिर्नित्यं समर्थयिष्यत इति विशेषः। इदमहं जानामीति धीस्तावज्जायते सा चेदम्पदार्थस्य ग्राह्यत्वं विना नोपपद्यते, न खल्वनुभवोऽपि नोपपाद्यः, अवहेलनीयत्वापत्तेरुक्तत्वात्। न खलु भिन्नास्त्रयो विकल्पाः परस्परवार्तानभिज्ञाः सम्बद्धतयाऽवगन्तुं शक्याः, एकदैव च "अहमिदं जानामीति" विषयविषयित्वमवगमयन् जायते प्रत्ययः, न तु क्रमशोऽहमिति वा, इदमिति वा, जानामीति वा। तस्माद्यथानुभवं विज्ञानाद्भिन्नमर्थक्रियायोग्यं वस्तु स्वीकर्तव्यम्। प्रत्यभिज्ञापि पदार्थानामैक्यं समर्पयन्ती कथं साहसमात्रेणान्यथयितव्या। नो खलु सादृश्यनिबन्धना सा, स्वतःप्रमाणानां धियां प्रमात्वस्य बाधकैकापोद्यत्वात्, न चात्र बाधकमुपलभामहे, न च समर्थासमर्थादिविकल्पो बाधकः, समर्थ एवोत्पद्यते इति ब्रूमः, तादृशोऽपि च सहकारिणमासाद्यैव कार्यं जनयति, एतादृशमेव तस्य समर्थत्वं यत्सहकारिणमासाद्यैव कार्यजननं नाम। योग्यता तु उत्पन्नमात्रस्यैव।

सहकारिसहितात्तस्मादेव कार्योत्पत्तेर्दर्शनात्,। केवलात्सहकारिण-स्तस्मादेव वा केवलात् कार्यं भवत्विविति शङ्कानवकाशात् ।

जनकत्वाजनकत्वलक्षणविरुद्धधर्माध्यासादपि न वस्तुभेदः, नहि धर्मो धर्मिणोऽभिन्न एव येनैव स्यादपि तु भिन्नाभिन्नः, न च तयोर्विरुद्धत्वात्कथमित्थमिति वाच्यम्, विरुद्धमिति ह्यप्रमाणिके प्रत्ययः, इदं तु प्रमाणसिद्धम्, सामानाधिकरण्यं हि सत्यपि भेदे घटपटयोः सत्यपि चाभेदे एकत्र घटे नानुभूतचरं भेदाभेदे एव पर्यवस्यति, तस्माद्धर्मादयो धर्म्यादिभ्यो भिन्नाभिन्नाः समानाधिकृतत्वात् व्यतिरेके घटपटवत् घटवच्चेति प्रमाणसिद्धौ भेदाभेदौ, तथा च कथं धर्मभेदेऽपि धर्मिणा भेद आलम्बनीयः, सत्यपि भेदे तस्यैव धर्मो नान्यस्येत्यत्र तु वस्तुस्वभाव एव शरणीकरणीयः । नश्वरानश्वरत्वविकल्पेऽपि नश्वर एव जायत इति वदामः, किन्तु नश्वरत्वं नाशयोग्यत्वं तच्च सति नाशकारणे फलमुपधत्ते ।

यत्राभिदधुर्वाचस्पतिमिश्राः-“ नहि तण्डुलाः पचेलिमा इति विनैव दहनसलिलसंयोगप्रचयभेदं विक्लिद्यन्ति, काष्ठानि वा भिदेलिमानीति कुठाराभिघातमन्तरेण दलन्ति” इति, न च तादृशप्रचयविशेषविशिष्टा एव तण्डुला पचेलिमा नत्वन्ये इति शङ्क्यम्, क्षणभङ्गभङ्गात् ।

न तु नाशस्वभावत्वं नश्वरत्वं, तद्धि नाशस्वरूपत्वमेव तथा च सति नाशस्यानाशे घटोऽपि न नश्येत्तयोरैक्यात् तथा च द्वितीयादिषु क्षणेष्वपि अनुवर्तेतैव घटः, नाऽपि च नाशमतियोगिनोरैक्यं शङ्कास्पदतामप्यर्हति, तस्मात्प्रत्यक्षबाधितमिदमनुमानम् ।

ब्रह्मज्ञानेतरबाधितत्वञ्चोपाधिः, स्वप्नादिप्रत्ययेषु तथा दर्शनात्, अदर्शनाच्च जाग्रत्प्रत्ययेषु, अपि च प्रत्ययत्वहेतुविषयकज्ञानं त्वया

प्रतिपाद्ये वादिनि जनयितव्यं, तज्ज्ञानं सालम्बनं वा निरालम्बनं वा आद्ये बाधः, चरमे स्वरूपाऽसिद्धिः।ज्ञानात्मकं प्रत्ययत्वमस्तीति चेत्, कथमेतद्भवताऽहं प्रतिपाद्यः एतयैवानुमित्येति तु नार्हति वक्तुम्, अन्योऽन्याश्रयापत्तेः, सति हेतुज्ञान एवाऽनुमितिः,सत्याञ्च तस्यां हेतुज्ञानम्, तस्मादुयतिकिञ्चिदेतत्। सहोपलम्भनियमोऽप्यन्यथा सिद्धः, स एव हि हेतुः साध्यं साधयितुं क्षमो, यस्तं विना न निर्वहेत्, अयं तूपायभावमादायाऽप्युपपत्स्यते, यथाहि प्रभा रूपग्रहे उपायतामनुवर्त्यपि न रूपात्मिका, तथा ज्ञाने उपायभूतो विषयो ज्ञानग्रहविषयोऽपि न ज्ञानमिति स्यात्. विषयस्य ज्ञानोपायत्वन्तु विषयोपरागेणैव ज्ञानग्रहस्य जायमानत्वम्।

अथवा मिथ्याभूतो यो विषयतारूपः सम्बन्धःस एवोपायो ज्ञानग्रहस्य स्वविषयविषयकत्वनियामकः, तस्य विषयेषु विद्यमानत्वेन सहोपलम्भ उपपाद्यताम्, न तु तस्यैक्यसाधकत्वम्। यदि च लाघवमेव परमीक्ष्यते ज्ञानाज्ञानाऽतिरिक्तत्वाभावे विषयस्य, तदपि न साधीयः, स्थूलार्थभङ्गेऽर्थसारूप्यमेव ज्ञानानां प्रामाण्यमिति वदतः सौत्रान्तिकस्य यथा ज्ञानार्थयोरत्यन्तभेदस्तथायोगाचारेणाऽपि स उपगन्तव्य एव, नहि सारूप्यमभेदे सम्भवि नाम, त्वयाऽपि च ज्ञानविषययोस्तादात्म्यमभ्युपगतमेव किन्त्वभेदे तादात्म्यं नोपपद्यत इत्यस्य निवेदितत्वात्सारूप्यमङ्गीकार्य्यमेव, कल्पितभेदस्वीकारे च तादाम्यमपि तादृशमभ्युपगम्यताम्।

यदि चाऽधुनाऽपि लाघवं परमाद्रियसे तर्हि ज्ञानोत्पत्तिनाशकल्पने गौरवात्किमिति न बिभेषि, तस्मादेकं नित्यं स्वप्रकाशं ज्ञानमभ्युपगम्य तत्र कल्पितमनिर्वाच्यं प्रपञ्चं स्वीकुरु, स चावयवावयव्यादिरूपेण यथातथाऽस्तु नास्यां काकदन्तपरीक्षायामस्माभिर्निर्बन्धो विधेयः सर्वथापि तु तस्यानिर्वाच्यत्वमेव, अनुभवोऽ-

पि चैवमनुरोत्स्यत एव, सर्वथा प्रपञ्चस्य ज्ञानातिरिक्तत्वेनानु-भूतिगोचरस्यानपलापात्।

सम्प्रयोगमन्तरेणापरोक्षत्वन्तु नैयायिकैरलौकिकसन्निकर्ष-स्वीकारात्स्वरूपासिद्धम्, असंविदाकारे बाह्यत्वे व्यभिचारि च, द्विचन्द्रादिभ्रमस्थले च द्वितीयचन्द्रोत्पत्तेरग्रे उपपादनीयत्वान्न ज्ञानाकारता, दाराः इत्यादि बहुवचनन्तु तथैव साधुत्वानुशासनात्, वस्त्वैक्येऽपि अवयवादिगतबहुत्वस्यावयविन्युपचाराद्वा शक्यसमर्थनमिति न साकारवादसहकारि। एवञ्च नेदं रजत-मिति प्रत्ययो रजतमेव निषेधति, नतु रजत इदन्त्वम्-तथा-हि सति, रजते ज्ञानात्मकत्वं त्वयोपपाद्यं तच्च पूर्वाभिहित-युक्तिभिर्बाधितम्, यदि च कदाचिदपि रजतस्य ज्ञानात्मत्वमनुभव पथमवतरेत् तदा पारिशेष्याददि इदमि रजतात्मतां प्रतिषेध्य ज्ञाने रजतात्मताऽध्यवसीयेत, नत्वेवं कदाचिदपि "अहं रजतमि"ति प्रतीतिर्जायते, तस्मात्प्रमाणाभावान्न ज्ञानाकारता भ्रमगोचर-स्येति सिद्धम्।

## असत्संसर्गख्यात्युपपादनम्।

द्वितीयविप्रतिपत्तिस्तु असत्तादाम्यविषयतामभ्युपेत्य प्रवृत्ता, तत्रनिषेधकोटिः खण्डिता, विधिकोटिःप्रथममित्थमुपपाद्या, तथाहि, पुरोवर्तिनं रजततया प्रत्येमीत्यनुभव पुरोवर्तिरजतयोस्तादा-त्म्यप्रतीतौ मानम्, तादात्म्यञ्च तदसत्, नहि पुरोवर्तिशुक्ते रजतेन सह तादात्म्यमस्ति तस्मादसदेवभासते। केवलस्यासतो मा नामास्तु भानम्, सदुपरक्तस्य तु तन्न दण्डवारितम्, सतो हीदृशो महिमा यदसदपि स्वोपरक्ततया भासयति, केवलस्यासतो हि भवज्ज्ञान मिन्द्रियैर्वा भवेदनुमानादिना वा, न तावत्प्रथमः कल्पः, विषयसन्नि-कृष्टतयैव ज्ञानं जनयितुमीशते इन्द्रियाणि. नचासता सन्निकर्षः सम्भाव्योऽपि, उपस्थितस्यैवार्थस्य च संसर्गो लिङ्गादिभिर्बोधनीयः,

नोचेदतिप्रसङ्गं को वारयितुं क्षमेत, व्याप्तिशक्त्योर्ग्रहश्च नासति सम्भवति, असम्भवंश्च कथमुपस्थितिं जनयेत, अजाता चोपस्थितिः कथमनुमितावुपयुज्येत, तस्मात्केवलमसन्न भासते।

वासनैव भासयतिचेति चेत् सा निरपेक्षा न समर्था भासने, सापेक्षत्वे तु सोऽपेक्ष्यो बाह्य एवेति। एषैव च वाचस्पतिमिश्रसम्मताऽन्यथाख्यातिः, अभ्युपजग्मुश्चैनां कुमारिलभट्टा अपि, यज्जगदे तैरेव—

"तस्माद्यदन्यथा सन्तमन्यथा प्रतिपद्यते,
तन्निरालम्बनं ज्ञानमभावालम्बनञ्च तत्।"

निराल०वा० ११७श्लो०।

यस्मादेवं बाह्यं समर्थितं तस्माच्छुक्तित्वेन सन्तं रजतात्मना ग्रहणादेव विज्ञानस्य निरालम्बनत्वं, नत्वात्मविषयकत्वेन। अभावेत्यस्यासदित्यर्थः, अतएव क्वचित्तथैव पाठः, अत्र ख्यातावनुमानं प्रमाणमग्रे स्फुटीभविष्यति। जैनैरप्येषैव ख्यातिःस्वीक्रियते इति ज्ञेयम्, उक्तञ्चैतत्स्याद्वादमञ्जरीटिप्पणे इति।

इदमत्रबोध्यम् —"सदसत्ख्यातिर्बाधाबाधा" दिति सांख्यसूत्रानुसारिभिर्विज्ञानभिक्ष्वादिभिः सदसत्ख्यातिशब्देन व्यवह्रियमाणाऽपि असत्संसर्गख्यातिरेव, यतस्तैरेवागादि—"स्वरूपेणाबाधः सर्ववस्तूनां नित्यत्वात्, संसर्गतस्तु बोध इति"। न च सत्संसर्गस्य बाधस्तस्मादसन्नेव-सः। एवं "रजतं वणिग्वीथीस्थरूपेण सत्, शुक्त्याध्यस्तरूपेण चासत्" इत्यप्युक्तम्, तन्नयेऽभावस्याधिकरणात्मतया रजतासत्त्वं शुक्तिनिष्ठं शुक्त्यात्मकमिति रजतमसदेव शुक्त्यात्मना जातं इति पर्यवस्यति।

भट्टपादानामपीयमेव कथा, तैः "भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्। स्वरूपपररूपाभ्यां सर्वं स तदात्मकमिति" स्वीकारात्, अधिकरणेनचाभावस्यतादात्म्यमे संसर्गो भेदा-

भेदरूपम्, अत एवात्यन्ताभेदोपगन्तुः प्रभाकरात्तन्मतभिदा। अतएव—"ननु भावादभिन्नत्वात् सम्प्रयोगोऽस्ति तेन चेति श्लोकार्थेनेन्द्रियेणैवाभावग्रहणसम्भवादनुपलब्धेः पृथक्प्रमाणत्वमाक्षिप्य "न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि न, धर्मयोर्भेद इष्टो हि धर्म्यभेदेऽपि नःस्थिते" इत्यनेन श्लोकवार्तिके तादात्म्यमुपापीपदन्। अतएव च कुसुमाञ्जलौ वर्धमानेन, "भट्टानामधिकरणे विशेषणत्वं नाभावस्य किन्तु तादात्म्यमि"त्यभ्यधायि, तस्माच्छुक्त्यात्मना रजतमसद्वर्तते एव। जैनैरपि परद्रव्यक्षेत्रकालस्वभावैर्वस्तुनोऽसत्त्वोपगमात्, वस्त्वनेकान्तवादस्य च भट्टैरपि "इहानैकान्तिकं वस्त्वित्येवं ज्ञानं सुनिश्चितमि"त्यभिदधद्भिर्वनवादे स्वीकारात्, "भावाभावात्मकत्वाद्वस्तुनो निर्विषयो ह्यभाव" इति जैनैरपि कथनाच्चैतादृशविषयेषु प्रायो जैनभट्टपादसाम्यमेव, तस्माज्जैनानामप्येषैव ख्यातिरिति मन्महे।

किन्तु रजतमसच्छुक्त्यात्मकमिति नैयायिकै र्नाभ्युपेतम्, तैरभावस्याधिकरणात्मनाऽनङ्गीकारादित्याशयेन "नान्यथाख्यातिः स्ववचोव्याघातादिति" सांख्यसूत्रेणान्यथाख्यातिरखण्डि। असतो भानमसम्भवीति स्ववचो व्याहन्यते तत्रासतो रजतस्य भानाभ्युपगमे इति तत्सूत्राशयः। भट्टादिनये तत्रासतोऽपि रजतस्य शुक्त्यात्मना वर्तमानत्वान्नैतत्खण्डनविषयतेति, हट्टस्थरजतस्य शुक्तिसंसृष्टतयाऽवृत्तेस्तु संसर्गासत्त्वमितिध्येयम्। एवं सूक्ष्मनिरीक्षणे मतैक्यपर्यवसानेऽपि आपाततो भेदप्रसिद्धिस्त्वेतेनाशयेन बोध्या— हट्टस्थरजतमत्रभासते इति वाचोभङ्ग्या संसर्गासत्त्वादसत्ख्यातिव्यपदेशः, शुक्तावसद्रजतं शुक्त्यात्मना सदेव भासत इति वाचोभङ्ग्या च सदसत्ख्यातिव्यपदेशः।

इयं समीक्षा विज्ञानभिक्षुभाष्यानुसारेण, किन्तु मञ्जूषायां "सदसत्ख्यातिर्बाधाबाधाभ्यामि"तिसूत्रस्य नागेशकृतव्याख्या-

नस्य "यावद्विशेषदर्शनमबाधः, तदुत्तरश्च बाधः, अधिष्ठानगतसत्त्वा-रोपेण तु यावद्विशेषदर्शनं बहिः सत्त्वेन प्रतीतिर्बुद्धिसद्रजतस्य" त्यस्यावलोकनेन कुमारिलभट्टपादमतादत्यन्तविलक्षणैव सद्-सत्ख्यातिस्तत्सम्मतेति प्रतीयते इति बोध्यम्, तत्र च विप्रतिपत्तिः प्राङ्निरूपितैवेति ।

## अथासत्संसर्गख्यातिनिरासः ।

तत्र शुक्तिरपि सती, रजतमपि हट्टे सत्, अत्र पुरोवर्तिनि च तद्र-जतं भासत इत्ययमंशोऽग्रे निरूप्यमाणायामन्यथाख्यातावपि तुल्यः, स चाग्रे भूषयिष्यते दूषयिष्यते च विस्तरशः । असत्संसर्गभानं पर-मत्र विशिष्टम्, तच्चस्वयमेव दूषितं तैः । नहि केवलमसद्भासितुं न क्षमते सदुपरक्तन्तु भासते इति शक्यसमर्थनम्, असच्चापरो-क्षानुभवविषयश्चेति व्याहतम्, नो खल्वसन् संसर्गः सत्ताद-त्म्यङ्गत इति वदितुं क्षमसे, सदसतोस्तादात्म्यानुपपत्तेः, उपरागा-नुपपत्तेश्च, असंश्च क्वचित्सम्बद्धश्चेति व्याहतम् । यदि च बौद्धैःसन्धिं विधायाऽसतोऽप्यपरोक्षानुभवं समर्थयसे तर्हि सर्वांश एवासत्ख्यातिमभ्युपगत्याऽपि स समर्थनीय इति व्यर्थोऽयं तत्र स्याद् बौद्धैर्विवादः। अयुक्तमिति मत्वा चेदमवहेलितं नव्यनैयायिकैः यत्र च गृह एव विवादस्तत्रापरैःकिमुवाच्यमिति किमृतस्य मारणे-नेति । तदुक्तं तर्कचणैः—"सन्मात्रविषय एव भ्रमः, रजतपुरो-वर्तिनोः सत्त्वात्, न च संसर्गोऽसन्, तदुभयातिरिक्तस्य प्रमाणा-नारोहात्संसर्गारोपस्थलेऽपि एवमेव, भ्रमत्वञ्च तदभाववति तत्प्र-कारकत्वादि" इति । एतेन पुरोवर्तिनं रजततया प्रत्येमीत्यनुभवो ऽपि सत्संसर्गविषयकत्वेनैवोपपादित इति ।

## अथ सर्वासत्ख्यातिनिरूपणम् ।

असत्त्वं ज्ञानविषयतासमनियतं न वेति विप्रतिपत्तिरधुना निरास्या । तत्र पूर्वः पक्षः-शुक्त्यतिरिक्तो देशो रजतन्चात्यन्ता-

भाववान् देशत्वात् शुक्तिवदित्यनुमानमसज्ज्ञाने मानम् । न च शुक्त्यतिरिक्ते घटादौ रजतत्वाभावस्वीकारात्सिद्धसाधनं, पक्षता-वच्छेदकावच्छेदेनानुमितिसितत्वात्, शुक्त्यतिरिक्तरजते साध्यासत्त्वाद्बाधस्तु नोद्भाव्यस्तत्र रजतत्वप्रतीतेः प्रमात्व एवास्माकं विप्रतिपत्तेः । अथ रजतत्वेनैव पक्षताऽस्तु, न चानुमितेराहार्यत्वापत्तिरत एवाकिञ्चित्करत्वापत्ति र्घटवत्त्वं स्वीकृत्य तत्रैव घटाभावमवगाहमानायाः प्रतीतेरिवेति वाच्यम् रजतत्वेन पराभिमतमिति रीत्या प्रयोगेऽदोषादितिचेदस्तु ।

ननु रजतसामग्र्यप्रसूतत्वमुपाधिः, शुक्त्यादौ सत्त्वेन साध्यव्यापकत्वं, रजतेऽसत्त्वेन च साधनाव्यापकत्वमिति चेन्न, पक्षमात्रव्यावर्तकत्वात् । अपिचोपाध्यभावेन साध्याभावे साध्यमाने व्यतिरेकव्याप्तावुपाधिः, तथाहि, रजतत्वेनाभिमतं रजतत्ववत् रजतसामग्रीप्रसूतत्वाद् व्यतिरेके घटवदित्यत्र व्यतिरेकव्याप्त्या, रजतत्वेन पराभिमतं रजतसामग्रीप्रसूतं न भवितुमर्हति रजतत्वाभाववद्घटवदित्यनुमितौ रजतसामग्रीनिष्ठप्रागभावाप्रतियोगित्वस्य सन्दिह्यमानस्योपाधित्वात्, साध्यव्यापकत्वं निश्चितम्, साधनाव्यापकत्वं सन्दिग्धम् । एवं रजतत्वं समवायेन रजतवृत्ति न जातित्वात् घटत्ववदित्यपि साधु, अत्रापि रजतसामग्र्यप्रसूतवृत्तित्वमुपाधिः पूर्वाभिहितदिशा निरास्यः ।

शुक्तौ च रजतत्वं न केनाऽपि स्वीकृतम्, यदि कश्चिदभ्युपजगाम, सोऽनुभवाननुसरणादेवावहेलनीयः; नहि शुक्त्याऽपि तादृशं कटकादि निर्मातुं पार्यते, यादृशं रजतादिति । एतेन शुक्ती रजतात्मना परिणमते इति केषाञ्चिदुद्घोषोऽपि प्रतारणायितः । पुरोवर्तिनि रजते वा "इदं रजतमिति ज्ञानं भ्रान्ति" रिति न वक्तुं सुशकम्, वर्तमानत्वात्तयोः । तयोः संसर्गांशे स्याद्भ्रान्तिस्तस्यासत्त्वात्; तथा चासत्ख्यातिर्दत्तपदा सर्वास-

वत्साधनेनैव विश्राम्यति, यदाहुः-

प्रसरं न लभन्ते हि यावत्कचन मर्कटाः ।
नाभिद्रवन्ति तावद्धि पिशाचा वा स्वगोचरे ॥

एकत्रासत एवापरोक्षभानस्य क्लृप्तत्वेऽपरत्राऽपि तदेवापरोक्षमवभासिष्यते, इति व्यर्थोऽयं प्रपञ्चाभ्युपगम इति शून्यतैव भगवती परमार्थसती विजयते ।

यदि धर्मधर्मिभावमनापन्ना एव इदंरजतसंसर्गास्त्रयोऽवभासन्ते ते चास्मन्नये सन्त एवेति भणसि तर्हि समूहालम्बनादस्य कियन्तं विशेषमाकलयसि, येनैकस्य प्रमात्वेऽपरस्य च भ्रमत्वे आदरः तथा च विषयस्य सत्त्वे बाधग्रह एव नोदियात्, उदेति च बाधग्रहस्तस्माच्च पूर्वग्रहस्य भ्रान्तित्वकल्पना, सति च भ्रान्तित्वे तदन्यथानुपपत्त्याऽसद्विषयकत्वं स्वीकार्यम्. सद्विषयकश्च भ्रमश्चेत्यस्य विरुद्धत्वात् । असदेव रजतमभादित्यनुभवोऽप्यसत्ख्यातौ मानम् । तदेवं प्रत्यक्षानुमानार्थापत्तयस्तत्र मानानीति सिद्धम् ।

तथापि कथमत्र मनःप्रत्ययमादधीमहि असतोऽपरोक्षतानर्हत्वात्, नोचेत्कथमतीतानागतयोरपरोक्षावभासः,-स्याच्चेत्थं सर्वः सर्वज्ञता, अन्यत्र वर्तमानस्यापि पुरोवर्तिनि असत्त्वात्, अतीतानागतानामपि चासत्त्वात्, असतश्चापरोक्षत्वस्वीकारात् सर्वज्ञतासम्पत्त्यर्थं तवागमेषु च साधनोपदेशा अपि वैयर्थ्यं कथन्नाश्नुवीरन्, तस्मात्त्याज्योऽयमसत्प्रकाशनसमर्थनाग्रह इति चेन्मैवं वोचः,

न खलु ममैव पुरत इयं चेतोव्यथाऽभिनेया, सर्वैरेव तु असत एव भानमभ्युपतेव्यमिति ब्रूमः । अन्यथाख्यातिवादिनां हि अन्यत्र देशेऽस्तु नाम रजतं, अत्र तु तदसदेव, अन्यत्र सत्तामात्रेण च विशेषं वदता कालिकातास्थभोजनेन तृप्तिमभिलष्यन् वाराणसेयोऽन्वहारि । नह्यन्यत्र सदपि अत्र कमपि विशेषमाधत्ते, अपरोक्षतयाऽवभासनाच्च नैषा स्मृतिरपि येन संस्कार एव विशेष आधेय

इति भणितुं शक्येत । अत्रैव रजतं सदिति ब्रुवाणस्तु रजतार्थिनं शुक्तिकाशकलैरेव किमिति न कृतार्थीकुर्यात् । आत्मख्यातिवादिनाऽपि बहिरसत एव भानस्वीकृतेरसतो भानमशक्यव्युदासम् ।

अत्रोत्पन्नं नूतनं रजतमिति व्याहरंस्तूपहास्य एव संख्यावद्भिः । तस्मादसत एव प्रतिभास इत्यक्रमेणाप्यालम्बनीयम् । अपि च न मन्नये व्यवहारेऽपि विश्वमिदं विश्वं गगनकुसुमायते एव, परमार्थतस्त्वलीकत्वं वदामः, नहि मया सांवृतं सत्त्वमपि पदार्थानां नेष्यते, नापि च विज्ञानं नास्थीयते, क्षणिकत्वभावनानिवर्त्यः स्थैर्यमेव शून्यत्वभावनया निवर्त्याऽबाध्यतापि व्यवहारिकी मयाऽभ्युपगतैव, यदाह,

"फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा,
मरीचिसदृशी संज्ञा, संस्काराः कदलीनिभाः ।
मायोपमं च विज्ञानमुक्तमादित्यबन्धुनेति" ।

शून्यताया परमार्थतामेव परं समर्थयामहे, विज्ञानमपि चानिर्वाच्यमभिदधता मया विज्ञानवादिमतप्रवेशोऽपि न व्यधायि, नहि विज्ञानस्याप्यनिर्वाच्यतां स मेने, येन मतैक्यं शङ्कास्पदमपि भवेत् । ननु बाह्यस्य प्रपञ्चस्यानिर्वाच्यत्वाविशेषे विज्ञानस्य सत्त्वं स्वीकृत्य योगाचारेण सहैकमत्यमेव किन्नालम्बसे इति चेन्न, विषयस्यानिर्वाच्यत्वसिद्धौ निर्विषयकज्ञानासम्भवात् ज्ञानस्य विषयसमानयोगक्षेमत्वात्, न खल्वनिर्वाच्यमपि नित्यं येन तस्यैव सर्वदाऽवस्थानात् ज्ञानधारायास्तद्विषयकत्वमेवेति शक्यवचनं स्यात् तस्माज्ज्ञानमप्यनिर्वाच्यमेव । अतएव " तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिता । तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिन" इत्यत्र परमार्थतोऽभावमित्येवार्थः, न तु सांवृतं सत्त्वमपि नेच्छन्तीत्यर्थः ।

सति चैवमसदेव विज्ञानं परमार्थतः समनन्तरप्रत्ययासादित-सामर्थ्यातिशयमसन्तमपि सन्तमिव प्रकाशयति, अतिशयश्च तस्य विषयजन्यज्ञानापेक्षया विषयाजन्यत्वमेव, एवञ्च सति सर्व-सर्वज्ञत्वापत्तिरपि न दानार्हा। कथमसतः समनन्तरप्रत्ययस्य सामर्थ्याधायकत्वं कथंञ्चासतः सामर्थ्याश्रयत्वमिति विकल्प-कल्पना त्वविद्यैवोत्सारणीया संवृत्याख्यया। तदेतदेव पदार्थानां संवृत्तिसत्त्वं ब्रूमहे। सिद्धे चैवं भ्रमस्थलेऽसद्भानेऽन्यत्राप्यसत्त्व-मनुमिमीमहे। यथाहुः—

न सन्नासन्नसदसन्नचानुभयतत्त्वकम्।
विमतं तर्कपीड्यत्वान्मरीचिषु यथोदकम्॥

न सद्बाध्यत्वात्, अस्य जगतोऽनुभूयते हि बाधो योगजप्रत्यक्षे शून्यत्वभावनाजननीके, यौक्तिकबाधश्च संक्षेपतोऽभाणि विज्ञानवादप्रस्तावे। नासद्, कालसम्बन्धात्, नहि गगनकुसुममपि कालेन सम्बद्धं, तथा सति जायेत नश्येच्च। न सदसद्, विरोधात्।

सद्भिन्नतयाऽसद्भिन्नतया च तात्त्विकत्वेन निर्वचनासम्भवात् सदसद्भिन्नमपि न, तस्मात्सत्यत्वेन लोके प्रतीतिसिद्धस्य सत्त्वं भवत् सांवृतिकमेव भवेत्, असत्त्वं तु तर्कपीड्यत्वेन ब्रूमः, तदभ्यधायि—

"चतुष्कोटि विनिर्मुक्तं तत्त्वं माध्यमिका जगुः" इति।
"द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना" इति च।

तस्मात्सकलकलाकलितमदोऽसदेव सचेतनं जगदिति रम्यम्॥

अथ सर्वासत्ख्यातिनिरासः।

तदेतस्य सर्वभङ्गस्य भङ्गमसूसुचद् भगवान् बादरायणो "नाभाव उपलब्धे" रितिसूत्रेण। अधिष्ठानस्य नाभावः, उपलब्धेःप्रमाणात्प्रमितेः। कश्चिद्धि परमार्थमालम्ब्यापरमार्थाः प्रतिपद्यन्ते यथा रज्ज्वादिषु सर्पादय इति च बभाषे भाष्यकृद्भि-

रपि । निरवधिकस्य बाधस्यासम्भवात् किञ्चिदधिष्ठानं चेतन-मवश्याभ्युपगमनम् । साक्षिणोऽपि बाधे तस्यान्य एव बाध्यः साक्षी, तस्याप्यन्य इति भवेदनवस्था, निस्साक्षिके च बाधे प्रमाणप्रश्ने किमुत्तरं, को ब्रूते सोऽस्तीति नास्त्येवेति किन्नस्यात् प्रमाणं विना च स्वीकारे किन्नाम यन्न स्वीकार्यत्वेनापाद्यं स्यात् । अन्वमानि चेदं धर्मकीर्तिनापि—'अप्रत्यक्षोपलम्भस्यनार्थदृष्टिः प्रसिद्ध्यतीति' भणता, किन्तु साक्षिणोऽपि क्षणिकत्वे नोक्तबाध-या मुच्यामहे इति तस्य नित्यत्वमेवातिष्ठामहे ।

तदुक्त आचार्यैः—बाधितोऽपह्नवोमानैर्व्यावहारिकमानता ।
मानानां तात्त्विकं किञ्चिद्वस्तु नाश्रित्य दुर्भणा

इति । सर्वथा प्रपञ्चस्यापलापस्तु नाधिगन्तुं शक्यः- तस्य प्रत्य-क्षादिप्रमाणगोचरत्वात्,अनिर्वाच्यत्वात्तु तस्य तद्विषयकप्रमाणानां व्यावहारिकमानताऽभ्युपगमनीया । सा च साक्षिणं स्वप्रकाशं नित्यं विना न निर्वोढुमीष्टे इति सोऽभ्युपेयते इति । नच विषयस्य मिथ्यात्वे निर्विषयकज्ञानासम्भवात्, ज्ञानस्यापिमिथ्यात्वमिति-वाच्यम् ज्ञानस्य सविषयकत्वनियमस्य प्रमाणशून्यत्वात्, ऐन्द्रि-यकज्ञान एवोक्तनियमस्य सर्वैः स्वीकर्तव्यत्वात्, अन्यथा यत्र ज्ञानं तत्र विषय इति दैशिकव्याप्तेः स्वप्नेप्यसम्भावितत्वात, कालिक्याश्च व्यभिचारादिति । तस्माद् मिथ्याभूतस्य कदाचिदपि मोक्षादौ सर्वथाऽत्यन्ताभावसत्त्वेऽपि निर्विषयस्य ब्रह्मरूपज्ञानस्यावस्था-मभ्युपेयम् ।

तदेवमयमसत्त्ववादोऽन्तिके वेदान्तस्य, प्रपञ्चासत्त्वस्वीकारात् असत्पदस्थानेऽनिर्वाच्यपदाभिषेकः परमतिरिच्यते अधिष्ठानत्वे-नाभिमते सद्वस्तुनि त्रैकालिकनिषेधप्रतियोगत्वं हि मिथ्यात्वमाल-लम्बिर औपनिषदाः । निरधिष्ठानस्य तादृशनिषेधस्य प्रति-योगित्वमनुमेनिरे माध्यमिका, ज्ञानज्ञेययोरुभयोरप्यनिर्वाच्य-

वदित्यपि साधु, असंसर्गाग्रहमात्रेणानुपपत्तेः। एवं ज्ञानत्वं विशेष्यावृत्तिप्रकारकवृत्ति प्रवृत्तिहेतुप्रत्यक्षविशेषगुणवृत्तिधर्मत्वात् इच्छात्ववत्, इच्छायाः प्रवृत्तिहेतुत्वमस्त्येव, व्यधिकरणप्रकारकत्वमपि सर्वसम्मतं, अदृष्टत्वमादाय व्यभिचारनिवृत्त्यै प्रत्यक्षेति विशेषगुणविशेषणम्। शत्रुभिन्नेऽपि "शत्रुं द्वेष्मी"तिप्रत्ययात् द्वेषत्वेऽपि व्यधिकरणप्रकारकत्वसत्त्वान्न व्यभिचारः। अथवा द्वेषस्य प्रवृत्तिहेतुत्वमेव नाभ्युपेमः, दुःखसाधनाभावसाध्यदुःखानुत्पादमुद्दिश्यैव शत्रुवधे प्रवृत्तिः। तथाच तत्रापीष्टोपायताज्ञानादेव प्रवृत्तिरिति। तस्मात्संस्कारसचिवमिन्द्रियं व्यधिकरणप्रकारकं ज्ञानं जनयतीति सिद्धम्।

अन्यथाख्यातिनिरासः। अनिर्वचनीयख्यात्युपपादनञ्च।

अथात्रानिर्वचनीयख्यातिमाश्रयद्भिः प्रतिविधीयते। व्यधिकरणप्रकारावच्छिन्ना या विषयता तन्निरूपकत्वं भ्रमत्वम्, स्वाधिकरणावृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतानिरूपकत्वमितियावत्, स्वं विशेष्यता। इदं रजतमित्यत्र शुक्तिनिष्ठा विशेष्यता तदधिकरणावृत्ति रजतत्वं, तन्निष्ठप्रकारतानिरूपितविशेष्यता—इदम्विशेष्यता तन्निरूपकत्वस्य सत्त्वेन लक्षणासमन्वयः।

तदयमत्र प्राज्ञम्मन्यः प्रष्टव्यः, विशेष्यमपि प्रकारेणावच्छिद्यते न वा। अवच्छिद्यत इति न वाच्यम्, कथं ह्यन्यवृत्तिधर्मेणान्यदवच्छिद्यताम्, सर्वैर्धर्मैः सर्वेषामवच्छेद्यतापत्तेः सर्वस्य सर्वात्मकतापत्तेरिति यावत् तथाचाहो समर्थितः स्याद्भेदवादः। नावच्छिद्यते इत्यपि न ब्रूयाः, विशेष्यप्रकारयोर्विषययोः परस्परमवच्छेद्यावच्छेदकभावाभावे ज्ञानमसन्तमेवावच्छेद्यावच्छेदकभावं विषयीकरोतीति मन्तव्यम्, तथा सति शून्यवादापत्तिपिशाची कथं त्वां मुञ्चेत्तार्किकभटम्। विषयतयोस्तु निरूप्यनिरूपकभावोऽस्तीति चेत्, विषययोस्तस्याभावे विषयतयोः स कथम्? उक्तं हि तर्कप्रकरणे

गदाधरभट्टाचार्यैः—"नहि ययोः सम्बन्धो न भासते तद्विषयतयो-निरूप्यनिरूपकभावो दृष्टचर" इति। दोषादिति चेत्, शून्यवादिनः सर्वस्य ज्ञानस्य दोषोत्पत्तिकत्वात्। दोषविशेषोऽभिमत इति चेत्, दोषविशेषाणां परिगणितुमशक्यत्वात्। अविद्यातिरिक्तत्वेनानुगमोऽस्त्विति चेत्, भ्रमस्याप्यविद्याहेतुकत्वेन शून्यवाद्यादिभिरस्माभिश्चाभ्युपगमात्। मया तावन्नाभ्युपयत इति चेत् माभ्युपगाः। कथायामित्थं वादिनां पुरतो भणितुमयुक्तत्वात्।

स्यादेतद्विषययोरपि सोऽस्त्येवावच्छेद्यावच्छेदकभाव इति चेत्, नन्वेतच्छ्रूयमाणमपि त्रपाकरमिति चेतनेन भाव्यम्। भो! नाबोधि मदीयो भावस्त्वया, अवच्छेद्यावच्छेदकभावश्शुक्तिरजतत्वरूप एव प्रकृते तस्याश्रयातिरिक्तस्यानभ्युपगमात् शुक्तिरजतत्वयोश्च सत्त्वादिति चेत्, नन्वाधाराधेयभावोऽन्यत्वे उपपद्यमानोऽत्रानुभूयमानो नोपपद्येताऽभेद इति। अवच्छेदकता रजतत्वे, अवच्छेद्यतेदम्पदार्थे इत्यनुभवात्। नहि भवत्यभेदे रूपभेदेऽपि तद्धटे तत्कम्बुग्रीवादिमानिति। अन्यत्रास्तु यथा तथा प्रकृते त्वन्यस्या गतेरभावादभेदेऽपि सोऽस्त्विति चेत्, अनिर्वचनीयताया अन्यस्या गतेर्जागरूकत्वात्, तव वामबुद्धेरपि मनसि सा स्थितैव, वाचोभङ्ग्यन्तरेण ब्रुवाणस्य तस्या निह्नवे लज्जैव परदर्शनस्वीकृतिहेतुका हेतुः। अतिरिक्त एव पदार्थस्तर्हीति चेत्, सोऽसन् वा शुक्तिरजतत्वयोः सन्वा, सन्निति ब्रुवाणस्तु मन्दात्तमेव जयसि परं न तु प्रतिवादिनम्। यतः सर्वस्य सर्वात्मकतापत्त्यापि न बिभेषि। असन्निति चेच्छून्यवादगृहं प्रविश तर्हि। स्वरूपसम्बन्धविशेष एव स तत्र यथायोग्यं कल्प्यत इति चेत्, अहो! किमिदं विशेषपदेनाभिधित्ससे, किमिति न व्यनक्ति। नूनं सैव भगवत्यनिर्वाच्यता त्वद्धृदयङ्गमाऽभूत्, येन तन्नामापि वक्तुं लज्जसे। अहो! तस्यां स्वानुराग एव प्रकटीकृतस्त्वया।

विशेषपदेनानुभवसाक्षिकत्वं सूच्यते इति चेत्, त्वादृशानुभवेऽस्माकं मनःप्रत्ययाभावात् सर्वजनानामयमनुभव इति निश्चेतुमशक्यत्वात्। बहुजनसिद्धानामपि देहात्मैक्यानुभवानां बाधदर्शनात् तस्य प्रमात्वमपि कथं साधयिष्यसि यथा कथञ्चिदनुभवस्त्वनिर्वाच्यत्वेऽप्युपपद्यत इति वार्तमेवैतत्।

एतेन तत्तल्लक्षणेषु विशेषपदं प्रक्षिप्य निर्वचनाभिमानिनो नैयायिका निर्वक्तुमसामर्थ्यं द्योतयन्तः पराहता वेदितव्याः। अत एव बुद्धिविशेषविषयत्वमवच्छेद्यत्वादिकमित्यपि निरस्तम्। बुद्धिरपि प्रमा वा भ्रान्तिर्वा। भ्रान्तिरिति चेत्तर्हि भ्रान्त्या तामेव निरूपयितुं प्रवृत्तोऽसि। प्रमेति चेत्तर्हि शुक्तिगतं रजतत्वावच्छेद्यत्वं प्रमितं मनुषे। अनतिरिक्तवृत्तित्वादिकमवच्छेदकत्वादिकमिति चेदन्यत्रास्तु यथातथा शुक्तिनिरूपिता तु न तादृशी रजतत्वे सर्वात्मकतापत्तेरेव। तदियमन्यथाख्यातिः स्वीकृता शून्यतामापादयन्ती बौद्धानां गुप्तचरी तर्कह्रदनिमग्नानां गृहेषु प्रविष्टेत्यतो भेतव्यम्।

एतेन स्वाधिकरणावृत्तिनिष्ठप्रकारतानिरूपितविशेष्यताऽनिरूपकत्वं प्रमात्वम्। विशेष्यताविशिष्टप्रकारताशून्यत्वं सर्वांशे प्रमात्वम्। विशेष्यतावैशिष्ट्यं च, स्वनिरूपितत्व-स्वाश्रयनिष्ठाधिकरणतानिरूपकताविशिष्टान्यत्वोभयसम्बन्धेन, निरूपकतावैशिष्ट्यं च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन, स्ववृत्तित्वं च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनेत्यादि लक्षणजातमपास्तम्। तादृशभ्रान्तिलक्षणघटितत्वादुक्तदोषादनिर्मोकात् स्वरूपसम्बन्धविशेषादिरूपविषयतया उक्तरीत्या खण्डनेन च खण्डनीयमिति दिक्।

नन्वस्ति महीयसी भिदा शून्यवादिपक्षात् मदीये पक्षे, अन्यत्र रजतत्वस्य सत्त्वाभ्युपगमादिति चेत्, सोऽपि न भ्रान्तिगोचराणां

सर्वेषामन्यत्र सांवृतं सत्त्वं पराचष्टे । मया तु पारमार्थिकं सत्त्वमालम्बीति चेत्, न तन्निर्वोढुं क्षम्यते इति वक्ष्यते । भवतु वा अन्यत्र सत्त्वेन प्रकृते पुरोवर्तिनि किमुपाकारि, यदभिहितं त्वदीयैरेव जयन्तभट्टैः—

"अथान्यदेशकालं तदस्त्येवेत्यभिधीयते ।
इहासन्निहितस्यास्य तेन सत्त्वेन को गुणः ।" इति

अयमेव तस्यान्यत्र सत्त्वे विशेषो यददोऽनुभूतमिति चेत् तत् किं शून्यवादिनाऽन्यत्र रजतादिकं नानुभूयते । अन्यत्राऽनुभवोऽपि च प्रकृतापरोक्षानुभवस्य किमुपकुर्यात् । इन्द्रियसहकारिसंस्कारसम्पादकत्वमेवोपकार इति चेत् तत्किं प्राभाकरैः शिक्षितोसि येन संस्कारजन्यां स्मृतिमुपजिगमिषसि । नैवं, ज्ञानलक्षणसन्निकर्षेण प्रत्यासीदद्रजतादि अलौकिकप्रत्यक्षविषयतामाश्रयतीति ममाभिसन्धिरिति चेत् अहो स्वदर्शनवपुर्निगूहनोपायताभिज्ञताचातुरी तव प्रतारणादोषभीतिमप्यत्यजो यया । भवतु वा कान्वियं ज्ञानलक्षणा प्रत्यासत्तिः, तर्ककटाक्षैरपरिचिता सा दूनमनाः तानवमातन्वती निजप्राणेभ्योऽपि जलाञ्जलिं विततारेति किंवदन्तो श्रवणातिथिरस्माकं चिरादभूत् । तत्किमियं न सत्या, सत्यैव तत्प्रमाणत्यागस्य सोपपत्तिकत्वात् ।

तथाहि, सत्यरजते इदं रजतमिति ज्ञानात् इदं रजतमितिभ्रान्तेर्न कमपि विशेषमाकलयामो येनैकस्य लौकिकसन्निकर्षजन्यत्वं द्वितीयस्य चालौकिकसन्निकर्षजन्यत्वं स्वीकुर्याम । सामग्रीविशेषे सति कार्येऽपि विशेषेण भाव्यमेव कार्यगतविशेषाभावाच्च न सामग्रीगतोऽप्यस्ति विशेष इति निश्चिनुमहे । सामग्रीवैषम्यात् तत् कल्पनीयमिति चेत् अन्योन्याश्रयगर्तपतितः कथमुत्सारणीयः स्याः, सति सामग्रीविषमभावे कार्यविषमभावः सति कार्यविषमभावे सामग्रीविषमभाव इति ।

ननु यथा सुरभिचन्दनमित्यत्र चाक्षुषप्रत्यक्षे सौरभांशे चक्षुषोऽयोग्यत्वात् संयुक्तसमवायेन च प्रत्यक्षताऽभ्युपगतौ रसादिग्रहणस्यापि तेनापत्तेरतिप्रसञ्जकत्वात् ज्ञानेनैव तत्सन्निधाप्यते इति वाच्यम्, एवञ्च सौरभांशे अलौकिकमपि चन्दनांशे लौकिकत्वात् लौकिकमिवानुभूयते तथा प्रस्तुतेऽपि रजतेन सममन्यप्रत्यासत्त्यभावेन ज्ञानेनैव तत्प्रत्यासाद्यते इति तदेव प्रत्यासत्तिताभाग् भवति । स्वसंयुक्तमनःसंयुक्तात्मसमवेतज्ञानजन्यसंस्कारविषयत्वसम्बन्धेन च नयनमेव रजतेन संगतमिति शब्दतत्त्यापि ज्ञानप्रत्यासत्तिरेव वर्ण्यते इति चेत् ।

नूनमिदं "स्वरूपख्याक्रियैव पराक्रिया" इति न्यायविषयतां नातिवर्तते । तथापि च घ्राणनयनाभ्यां संयुक्ते सुरभिचन्दने वा, नयनमात्रसंयुक्ते वा सौरभांशे ज्ञानं प्रत्यासत्तयसि । आद्ये प्रत्यासत्तिद्वयेनैकमेव ज्ञानमभ्युपगम्यताम् । घ्राणनयने न सम्भूयैकज्ञानजनके परस्परनिरपेक्षकारणत्वात् चक्षुःश्रोत्रवदित्यनुमानं तु नोदेतुमर्हति, अयं घटपदाभिलप्य इत्यङ्गुलिनिर्देशपुरस्सरशब्दश्रुत्यनन्तरं चक्षुःश्रोत्राभ्यामेकस्यैव ज्ञानस्य जननात् दृष्टान्ते साधनवैकल्यात् । न च चाक्षुषत्वघ्रातित्वयोः साङ्कर्यमिति वाच्यम् तयोरुपाधित्वेन जातित्वाभावात्, नव्यैः साङ्कर्यस्य जातित्वबाधकतानङ्गीकाराच्च । यद्ज्ञानं यदिन्द्रियविशेष्यसन्निकर्षप्रसूतं भवति तत्तदिन्द्रियप्रयुक्तजातिं भजतीति नियतौ च सुरभिचन्दनमिति ज्ञानं चाक्षुषचन्दनविशेष्यकत्वात् चाक्षुषत्ववदस्तु चन्दने सौरभमिति घ्रेयविशेष्यकत्वात् घ्रातित्ववदस्तु । तथा च जातिसाङ्कर्यं न शक्यशङ्कमपि । यदि च नयनमात्रसंयुक्ते ज्ञानं प्रत्यासत्तिपदवीमधिरोहयसि तदापि किं सौरभं पूर्वं घ्रातं न वा यदि घ्रातं तदा प्रत्यभिज्ञयैव "तदेव सुरभिचन्दनमि" त्याकारया भूयताम् तथैवानुभवात् यदि न घ्रातम् तदा "इदं चन्दनमि"

त्येव कथं निराधारि, अन्यकाष्ठानामपि तत्सदृशसंस्थानाश्रयत्वात् यदि च तत् शक्यनिश्चयमभिमनुषे तदास्त्वनुमितिरेव इदं काष्ठं सुरभिचन्दनत्वादित्याकृतिका ।

अपि च ज्ञाने सन्निकर्षत्वालौकिकत्वरूपधर्मद्वयकल्पनामपेक्ष्य गुणग्रहार्थं कॢप्ते संयुक्तसमवाये एवैकोऽलौकिको विशेषः कल्प्यतामिति लघीयसी कल्पना तस्मान्नास्ति तज्जीवने हेतुः । न केवलं साधकाभाव एव बाधकमपि वरीवर्ति । तथाहि, साध्यस्य ज्ञानलक्षणप्रत्यासत्त्या पक्षस्य च चक्षुरादिना प्रत्यक्षत्वात् अनुमानप्रामाण्यमुच्छिद्येत । अतीन्द्रियपक्षकस्थलेऽपि मानसप्रत्यक्षसम्भवात् । नच पृथिव्यां तदितरभेद इत्याद्यनुमितिस्थले साध्यप्रसिद्धेरनङ्गतया तत्र ज्ञानलक्षणसन्निकर्षप्रयोजनाभावात् नानुमितिमात्रमुच्छिन्नमीति वाच्यम् तस्या अर्थापत्त्यन्तर्गतत्वात् दीधितिकारादिभिरपि केवलान्वयिप्रकरणेऽमुष्यास्तत्रार्थापत्तावेवान्तर्भावाङ्गीकाराच्च ।

एवं सौरभं पश्यामीति प्रतीत्यापत्त्यापि दुष्टेयं प्रत्यासत्तिः, नच दृशधातुसमभिव्याहारे लौकिकविषयिताया द्वितीयार्थतां स्वीकृत्योक्तापत्तिर्वारणीयेति साम्प्रतं स्यादेवं यदि ज्ञानस्य प्रत्यासत्तित्वसिद्धौ तदधीनज्ञानस्यालौकिकविषयित्वं सिद्ध्येत्, न तु तदद्यापि सिद्धम् । तस्मान्न ज्ञानप्रत्यासत्त्यालम्बनेनापि अन्यथाख्यातिः शक्योपपादेति सिद्धम् । तदमी शेमुषीणां कोषा एव तार्किका इति त एव समालोचयन्तु इति कृतमधिकेन ।

दोषालिङ्गितमिन्द्रियमेवान्यदेशस्थरजतमपरोक्षतया ग्रहीष्यतीति दुर्भणितिः, तथा सति क्ष्मायां विलसत्कमलमपि नभसि नयनेन गोचरो विधीयेतैव दुष्टेन । अपि च रजतप्रत्यक्षत्वावच्छिन्नं प्रति तत्संयोगस्यैव कारणता निरचायि । रजतलौकिकप्रमात्मकप्रत्यक्षतयैवावच्छिन्नत्ति गता रजतसंयोगत्वावच्छिन्नकार-

णतानिरूपिता कार्यता, न पुनरलौकिकप्रत्यक्षतयेति भेदभणि-तस्तु श्रद्दधानानां विनेयानामेव चेतांसि रञ्जयेत्। गौरवकारिणी निर्विकल्पाव्यापिनी चैषा न शुश्रूषयापि गोचरीक्रियते। न खलु निर्विकल्पमपि ज्ञानं तत्प्रकारकत्वघटितप्रमात्ववत् येनोक्तकार्यता-वच्छेदकं तत्रापि वर्तेत। रजतसंयोगकार्यतायास्तु तत्र विद्यमान-त्वात् कार्यतान्यूनवृत्तित्वान्न तस्या अवच्छेदकत्वम्।

तस्मादत्रैव रजतं वर्तेत इत्यकामेनाप्यभ्युपेयम्। ननु त्व-न्मतेऽपि रजतस्य ज्ञातसत्ताकतया सन्निकर्षासम्भवात्कथं प्रत्य-क्षतेति चेत् न, तत्तद्दोषसंस्करादिसहकृताविद्याया भ्रमोपादनत्वात् चाक्षुषाद्युपादानत्वस्य मनस्येव स्वीकारात् न भ्रमस्य चाक्षुषादि-रूपत्वं प्रामाणिकम्। एवं चाधिष्ठानचाक्षुषादौ भ्रमस्य तादात्म्या-ध्यासादेव भ्रमे चाक्षुषत्वाध्यासात् चाक्षुषादिविषये च भ्रमविषय-स्याध्यासात् रजतं पश्यामीत्यादिप्रतीतयः उपपद्यन्ते इति न कोऽपि दोषः।

व्यावहारिकरजतप्रत्यक्षत्वावच्छिन्नं प्रति तत्संयोगत्वेन कारणत्वस्वीकारे तु नोक्तशङ्कासमुन्मेषोऽपि। व्यवहारिकस्थले ह्यसौ कार्यकारणभावः क्लृप्तः। नचैवं प्रमास्थले एवोक्तकार्यकार-णभावस्य कल्पनेन प्रमात्मकप्रत्यक्षत्वमेव तादृशसंयोगकार्यताव-च्छेदकमस्त्विति शङ्कनीयम् निर्विकल्पकाव्याप्त्या दत्तोत्तरत्वात्। मन्मये प्रातिभासिकस्य तस्य साक्षिभास्यत्वेन प्रत्यक्षत्वाभावेऽपि क्षत्यभावाच्चेति।

तच्च प्रातिभासिकं, हट्टस्थरजतादिदमेव तस्य वैलक्षण्यं यत्तत् ब्रह्मज्ञानात् पूर्वमेव बाध्यत इयं शुक्तिरिति ज्ञानेन। स्वविषयशूराणि हि ज्ञानानि। इदं रजतमहं जानामीत्यनुसन्धानबलात् यादृशं तद्ध-र्मेणावगाह्यते तादृशमेव स्वीक्रियते। तच्चानिर्वचनीयमज्ञानपरिणा-म्युपादानकम्, अन्यस्य कारणस्य तत्रावर्तमानत्वात्, तच्च तेने-

दमवच्छिन्नचित्येवोत्पाद्यते अध्यस्तस्याधिष्ठाने एव कल्पनास्वीकृत्यौचित्यात् जडस्य च स्वयं बाध्यत्वेनाध्यस्तत्वेनाधिष्ठानताऽसम्भवात्, फलबलेन चात्यन्ताभावज्ञानसामग्र्या बलवत्त्वोपगमादत्यन्ताभाव एव ज्ञानविषयो भवति रजतस्य, रजतमुत्पन्नं विनष्टं चेति प्रतीतिश्च न जायते। रजतमहं पश्यामि मिथ्यैव मम रजतमभादित्यादिप्रतीतिबालात् सिद्धोत्पत्त्यादिकमपि रजतमत्यन्ताभावप्रतियोगितयैव गोचरीक्रियते। अत्यन्ताभावस्य विरोधस्तु प्रागभावप्रध्वंसाभ्यां नव्यैरिव नैयायिकैरस्माभिरपि नाङ्गीक्रियते।

## तत्रायं संक्षिप्तो राद्धान्तस्य पन्थाः।

कदाचिदपि संशयव्यतिरेकप्रमाद्यविषयत्वात् ज्ञानस्य स्वप्रकाशत्वसिद्धौ स एवात्मा नित्यानन्दात्मकः शून्यनिराकृतियुक्तिभिः, ज्ञानं नित्यमेकं चोपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वात्परमते गगनवदित्यनुमानेन चोत्पत्तिविनाशप्रतीतेरवश्यकल्प्यविषयसम्बन्धोत्पत्तिविनाशविषयतयैवोपपत्त्याऽप्रयोजकताशून्येन श्रुत्यादिभिश्चाभ्युपेयते, अन्यथा तस्याऽनुभवान्यत्वे दृश्यत्वेन मिथ्यात्वे शून्यवादः प्रसज्येतैव। तच्चाद्वैतं, सर्वप्रमाणमूर्द्धाभिषिक्तया श्रुत्या तथैवाधिगमात्।

स्वप्रकाशानन्दाद्वैतचैतन्यरूपत्वमेव तदीयं सत्त्वं, द्वैताद्वैतपक्षपातं परित्यज्य समालोचनेऽपि च सुषुप्तौ समाधौ विषयसंसृष्टानन्दानुभवसमये वा तत्कस्य न चकास्ति, सूक्ष्मं तत्त्वं निश्चेतुकामानां च जनानां समाहितमेव मनस्तस्मिन विज्ञानजलधौ क्षणमपि लीनमद्वैतात्मकतां गतमिव तत्तत्त्वं निर्णेतु प्रभवति नान्यथेति त एव जानन्ति। सेयमद्वैतावस्था कस्य नामानन्दं नावहति। यदाह श्रुतिः "द्वितीयाद्वै भयं भवति" "आनन्दं ब्रह्मणो विद्वान न बिभेति कदाचनेति" तदिदमद्वैतं

व्यपगतपाप्मसंस्पर्शैः शान्तसमाहितचेतोभिरित्थमनुभवगोचरी-क्रियमाणं प्रत्यक्षसिद्धं पुरुषार्थमेव । तदिदं शेमुषीरमणैर्न कदाप्यवहेलनीयम्-यथाहुः—

धीधना ! बाधनायास्यास्तदाप्रज्ञां प्रयच्छथ ।
क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौ यदीच्छथ ॥

सिद्धे चास्मिन् सर्वविद्वदभ्यर्थनीये परस्मिन पुरुषार्थेऽद्वैतेऽन्यत्किमपि न परमार्थतः स्वीक्रियामर्हति, अद्वैतव्याहतेरेव, प्रत्यक्षादिसिद्धश्चानृतनिकुरुम्बोऽभ्युपेयमानोऽपि न काञ्चित्क्षतिमावहति, अनृतानां सहस्रैरपि परमार्थतोऽद्वैताव्याघातात् । यदाहुः—

"न भूमिरूषरवती मृगतृड्जलवाहिनीं सरितमुद्वहति ।
मृगवारिपूरपरिवारवती न नदी तथोषरभुवं स्पृशति ।"

एवं च दृश्यमानोऽयमनृतनिवहः कुतः कथं किमर्थं च प्रादुरासीदिति विचारणा समुन्मिपति नो खलु तस्मात् विगतसकलकलङ्कात् निमृष्टाखिलक्रियाकारकफलभावात् चिदानन्दवपुषोऽद्वैततत्त्वात् किमप्युत्पत्तुमीशीत, न चायमनुत्पन्न एव, परिणामित्वात् नापि च ब्रह्मान्यत् किमपि स्वीकृत्य सत्यं तस्मादेवैतदुदपद्यतेति निर्णेतुं पारयामोऽद्वैत व्यवस्थितेरेव । तदेवं विविधसंशयाकुलचेतसमुद्दिश्य मातरन्ती तत्र भवन्तो श्रुतिर्बोधयितुं प्रावर्तत "तस्मादानन्दादेव खल्विमानि भूतानि समुत्पद्यन्ते" इत्यादिका । कथं चासावद्वैततत्परापि द्वैतजनिं तस्मादेव वर्णयेत्, न च तदप्यनित्यमित्यावेदितं, येन तदेव परिणमेत न च श्रुतिबलाद् ब्रह्मणि परिणामित्वं नित्यत्वं चोभयमप्यास्थेयं, युक्तिविरुद्धार्थस्य शतैरपि श्रुतीनामुपपादयितुमशक्यत्वात् ।

तदित्थं श्रुत्यर्थं निरूपयद्भिः मीमांसामांसलवैदुषीभिरित्थं श्रुतिहेतुकार्थापत्त्या निरणायि—

"चित्रायागः पशुफल इति श्रूयमाणेऽपि चित्राऽ-

पूर्वद्वारं पशुफलतयाऽऽक्षिप्यते तत्र तद्वत् ।
चैतन्यात्मा जगदुदयकृच्छ्रूयतेऽत्रापि पश्चान्-
मायादीनां भवति जगति द्वारभावः फलेऽस्मिन् ॥"

अस्ति काचिच्छक्तिर्मायादिपदव्यपदेश्याऽघटितघटनापटीयसी यां द्वारीकृत्य व्यावर्तितादो ब्रह्म। श्रुतिरपि च तादृशैः शब्दैस्तां निरदिशत् "मायां तु प्रकृतिं विद्यात् मायिनं च महेश्वरम्" 'अहरहर्गच्छन्तोऽपि च तमात्मानं न विदुरनृतेन प्रत्यूढ़ा' "तुच्छेनाभ्वपिहितं यदासीत्" "नीहारेण प्रावृताः" इत्यादिका। तस्या आच्छादकत्वादिश्रवणादेव च न साऽदृष्टमेवेति भणितिः शोभते अत एव च सा भावरूपा, आहुश्च—

"नाभावताऽस्य घटते वरणात्मकत्वात्,
नाभावमावरणमाहुरभावशौण्डाः ।
अज्ञानमावरणमाह च वासुदेवः,
तद्भावरूपमिति तेन वयं प्रतीमः ॥"

वासुदेव इति अज्ञानेनावृतं ज्ञानमिति वचसा। परिपूर्णचिदानन्दस्य च सकलजनानुभवानधिरोहणान्यथानुपपत्त्या तामुपयन्ति। अतएव केषांचित्परिदेवनमपीदं—

"सुप्त्वापादुत्थिताश्चैवं निर्विद्यन्ते हि कामुकाः,
वृथेयमन्तरेणैव कामिनीं यामिनी गता ।
आश्लिष्टामप्यबुद्ध्वैनां मृतवच्छयितं मया,
भुक्त्वा च परमानन्दं तस्य च स्मरणादयम् ।
स्वल्पाल्पसुखहान्यैवं निर्वेदो नावकल्पते,
तत्सुखं विस्मृतं चेत्स्यात्सुखमस्वाप्समित्ययम् ।
व्यवहारो न युज्येत दुःखानुभवे त्वियम्
सुखव्यवहृतिस्तस्माद्गौणवृत्त्येति निश्चयः ॥"

अनवसर एव, कःपरिपूर्णापरिच्छिन्नानन्दानुभवं सुषुप्तावुपेयाय,

अज्ञानाच्छन्नो ह्यानन्दस्तत्रानुभूतिगोचरः। ऊचिरे चाचार्याः—

"अप्यानन्दः श्रुतः साक्षान्मानेनाविषयीकृतः। विषयानन्दाभिलापं स न मन्दीकर्तुमप्यलमि"ति। भ्रमोपादानताऽन्यथानुपपत्तिरपि च तस्याः साधने सफलमेव प्रायतिष्ट। उपरिष्टात्स्फुटीभविष्यति चैतत्।

एवं विमतं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं, अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्, देवदत्तप्रमा स्वप्रागभावातिरिक्तानादिनिवर्तिका, प्रमात्वात् यज्ञदत्तप्रमावत्, विमता प्रमा, स्वाभावातिरिक्तानादिप्रध्वंसिनी, कार्यत्वात्, घटवदित्यादिमहाविद्यानुमानशतैश्च साऽवलम्बे।

त्वदुक्तमर्थं न जानामीत्यादिप्रत्यक्षमपि न तां विना निर्वहति सति त्वदुक्तार्थज्ञाने ज्ञानसत्त्वादेव असति च प्रतियोग्यज्ञानादेवोक्तव्यवहारानुपपत्तेः, सेयं सिद्ध्यसिद्धिभ्यां व्याहतिर्व्यपदिश्यते। सामान्यतो ज्ञातत्वे विशेषतोऽज्ञातत्वेऽपि नेयं व्यवहृतिर्निर्वहेत ज्ञातेंऽशे ज्ञातत्वादेव न जानामीति व्यवहारानुपपत्तेः, अज्ञाते चाज्ञातत्वादेव प्रश्नानुपपत्तेः। "त्वदुक्तेऽर्थे मम प्रमाणज्ञानं नास्ति" इत्येवं तामर्थापयन्नपि चानुभवमन्यथयन् न तामुपपादयितुं क्षमते, यतस्तदाकारस्य प्रमाणज्ञानस्यैव तत्र सत्त्वात्, अतएव चैतदतिरिक्तं प्रमाणज्ञानं मम नास्तीत्युक्तावपि व्याघात एव तस्य तदाकारस्यैव सत्त्वादेव, अतएव अभावज्ञाने प्रतियोगिज्ञानकारणतानभ्युपगमेऽपि न निस्तारः। न च भवन्मतेऽपि साक्षिरूपज्ञानविषयत्वस्याज्ञानावच्छेदकतया विषयेऽपि सत्त्वात् कथं न जानामीति व्यवहार इति वाच्यम् सर्वसाधकत्वेनैव साक्षिणो धर्मिग्राहकमानसिद्धत्वात्, तथाहि, अज्ञातो घटोऽस्तीति कथं निश्चेयम्, प्रत्यक्षानुमानादिभिर्निश्चयेत्वेऽज्ञातत्वमेव व्याहतिकवलितम्, निश्चयस्तु तस्यावश्य-

कोऽन्यथा ज्ञानकाले एव घट उत्पद्यते इत्यत्र किमुत्तरं, तस्मात्साक्षिणैव अज्ञानावच्छेदकतया सोऽनुभूयते इति नाज्ञानविरोधी साक्षी किन्तु प्रकाशक एवेति। दृष्टिसृष्टिवादेऽपि घटपटादिभ्रमाणां अज्ञानादेश्च दृष्टृत्वेनावश्यकल्प्य इति।

अपि च प्रत्यक्षं प्रति विषयस्य कारणत्वात् कार्यकारणभावग्रहार्थमपि घटस्य पूर्वं सिद्धिरपेक्षिता, स्वासमानकालीनाज्ञाततावि शिष्टघटादिविषयकज्ञानस्य सम्भवेऽपि अज्ञातत्वविशिष्टघटादिनिष्ठकारणतायां नोपयोग इति स्वसमानकालिकाज्ञाततावि शिष्टघटादिसिद्धये साक्षी शरणीकरणीय इति न तस्याज्ञानविरोधित्वम्।

सेयं माया न सत्या, उक्तयुक्तेः, "भूयश्चान्ते विश्वमायानिवृत्तिरिति" तन्निवृत्तिप्रतियोगित्वश्रुतेश्च, नापि शशशृङ्गायमाणा, उक्तप्रमाणसिद्धत्वादेव, अत एव "तुच्छेनाभ्वपिहित" मितिश्रुतिगततुच्छशब्दः सद्भिन्नत्वसादृश्येन गौण एव तस्याम्, तदियमनिर्वचनीया, उभयविलक्षणा। अत एव च तां श्रुतिरनृतेन- प्रत्यूढा" इत्यत्र अनृतशब्देन व्यपादीदिशत्। ब्रह्मसत्त्वमुपदिश्य च "नासदासीन्न सदासीदिति" च सदसद्विलक्षणं वस्तु अचिकीर्तत्। सदसत्त्वे किञ्चिन्निष्ठात्यन्ताभावप्रतियोगिनी धर्मत्वात् रूपरसवदित्यनुमानं च सामान्यतस्तामालम्बते। स्वप्रकारकधीविशेष्ये बाध्यत्वं वा, सद्भिन्नत्वे सति असद्भिन्नत्वे सति सदसदुभयभिन्नत्वमिति च तत्रानिर्वाच्यत्वम्। सेयमेव शुद्धब्रह्मविषयत्वेन माया, स्वकार्यावच्छिन्नब्रह्मविषयत्वेन चाविद्येति व्यपदेशमश्नुवती द्वितयतां गतेति। इदन्तु तत्त्वमुपाववर्णन् नारायणसरस्वतीपादाः—

"भिन्ना यद्यपि नाविद्या मायातो वस्तुतः क्वचित्
तथापि गुणवैषम्यात्तयोर्नाम विकल्प्यते।
सत्त्वात्मिका तु मायाख्यां लभते कार्यगौरवात्।

स्वाश्रयामोहहेतुत्वात्सार्वज्ञ्यादिगुणार्पणात् ॥
स्वाश्रये, सैव तमसा रजसा च स्वमाश्रयम् ।
मोहयन्ती त्वसार्वज्ञ्यदुःखित्वादिगुणार्पणात् ॥
अविद्याख्यां च लभते नातो भेदस्तयोः क्वचित् ।
मायाविद्याविभागेन शिरोराहुविभागवत् ॥
विषयाश्रययोस्तस्या भवेद्भेदविकल्पनम् ।
परमार्थतस्तु नैवास्ति भेदश्चिन्मात्रतः स्वतः ॥
जीवाश्रया ब्रह्मपदा त्वविद्या तत्त्वविन्मता ।
ब्रह्माश्रया जीवपदा माया सैव प्रकीर्तिता ॥ "

विमता माया समानाश्रयविषयिका तमश्शब्दवाच्यत्वात् सम्मततमोवदित्यनुमानेन च सा समानाश्रयविषयिकेतिन्यरूरूपन् । आस्तां यथा कथञ्चिदेषा ब्रह्मधवा, विरक्तचिरौरात्मारामैर्न बहु विचार्यतामर्हति. यदभ्यधात् —

कार्यं चेदवगम्येत किं कारणपरीक्षया ।
कार्यं [illegible]ावगम्येत किं कारण परीक्षया । इति जयन्तभट्टः ।

तदियं माया ब्रह्मणेदं दृश्यमानं विविधं जगदजीजनत् चराचरात्मकं ब्रह्माध्यासमापन्नम् ।

ब्रह्मणि च सामान्यतो ज्ञातत्वे सति विशेषतोऽज्ञातत्वमधिष्ठानत्वम् । अज्ञाततां चैषैव समपीपदत्, सत्यानृततादात्म्यभावश्चायमध्यासः । स च दृग्दृश्ययोरतिवैपरीत्यं गतयोरपि प्रतीयमानतादात्म्यान्यथानुपपत्त्या कल्प्यते, तत्र ब्रह्मैव सत्यमधिष्ठानमनुस्यूतत्वात् -पूर्वाभिहितयुक्तेश्च, तदन्यदनृतम् । अन्यस्य सर्वस्याध्यासमुपपादयन्ती चासौ माया स्वाध्यासे नान्यदपेक्षते इति कल्प्यते माभूदनवस्थेति, बभणुश्च —

भेदं च भेद्यं च भिनत्ति भेदो, यथैव भेदान्तरमन्तरेण ।
मोहं च कार्यं च बिभर्ति मोहस्तथैव मोहान्तरमन्तरेण ॥

तेनानेन पदपदार्थकदम्बेनोपादानमेवानुगन्तव्यमुपादेयेन प्रपञ्चेनेति आविद्यकं मायिकमनिर्वाच्यं चोच्यते। किमर्थमेतेनोदपादि? किमिति चानन्दजलधिरपि दुःखजलधीयति? किमिति च चेतनोऽपि मुग्ध इव स्वयमेव बबन्धात्मानमेव? इत्यादि प्रश्ननिवहमपि सैव माया लोकोत्तरचमत्कारिणी उत्तरीतुं पारयति स्वीकृता सती। न वयमन्यदार्शनिका इवासदुत्तरैर्जिज्ञासून् प्रतारयामः। यादृशं हि वस्तुसतत्त्वं निरीक्ष्यते तदेवाभिधीयते। आरोपे सति निमित्तानुसरणमिति नीतिमालम्बमानैश्च कारणमनिर्वाच्यमेवास्माभिरकल्पि।

यत्रोक्तं श्रीगौडपादाचार्यैः—क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे। देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा'॥ स्वाभावा इत्यविद्येति।

तामिमामाचार्योक्तिं निशम्य न कस्य मनः शाम्यति, निष्पक्षपातं वस्तुस्वभाववर्णनपरमिदं वचो वस्तुतत्त्वमनुभूतिपथमवतार्यैवाचार्येण निरटङ्कीति न कस्य शममावहेत्, अहो धन्यानि धन्यानां महात्मनां वचांसि। न परमस्मदीया आर्याचार्या एवास्मानित्थं सद्वचोभिः शान्तयन्ति, श्रुतिरपि भगवती विचारगहनाम्बुधावस्मिन्निमज्ज्येत्थमेवालासीदृग्वेदीया—

"न सदासीन्नासदासीत्तदानीं नासीद्रजो न व्योम परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥
को अद्धा वेद क इह प्रवोचत् कुत आजातः कुत इयं विसृष्टिः।
अर्वाग् देवा अस्य विसर्जनेनाथ को वेद यत आबभूव"॥
इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
योऽस्याध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदि वा न वेद" ८,७, १६, २२। इत्थमभिव्यक्ततयाऽपि अनिर्वाच्यवादे श्रुत्या ख्याप्यमाने यदि न कश्चित् श्रद्दध्यात् तदास्माभिः किं कर्तव्यम्, मन्द-

भाग्यमेव तस्य तत्र हेतुः। यदाहुः—

ईश्वरानुग्रहादेषा पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणां यदि जायते इति ॥

अभ्यधाच्च परनिरुक्त्यभिमाननिराकरणपटीयान् श्रीहर्षः-

"मम चानिर्वचनीयतैव सर्वप्रतीतिव्यवहारव्यवस्थितिपर्यनुयोगवाणवारणाय वज्रवारवाणायमाना विजयते इति।"

"समस्तलोकशास्त्रैक्यमत्यमाश्रित्य नृत्यतोः ।
का तदस्तु गतिस्तत्तद्वस्तुधीव्यवहारयोः ॥
उपपादयितुं तैस्तैर्मतैरशक्यनीययोः ।
अनिर्वक्तव्यतावादपादसेवा गतिस्तयोः।" इति च ॥

एतादृशानिर्वाच्यप्रपञ्चान्तर्गतश्चेदमचारुतरं कलेवरम्, तत्परिमितमेव तत्रास्ति मनः। तच्चानित्यं परिच्छिन्नत्यालिङ्गितत्वात् घटादिवत् तैजसत्वञ्च तस्य तत्कार्यमवलोक्य स्वीकृतम्, यथाहि प्रदीपो वा चक्षुर्वा दूरस्थकलशाद्यात्मना परिणमते, एवं मनोऽपि। इन्द्रियद्वारा च तदिन्द्रियसंयुक्तमेव विषयं व्याप्य तदाकारं भवति। सैव वृत्तिरिति कथ्यते। तन्निर्गमश्च पारोक्ष्यापरोक्ष्यव्यवस्थार्थं स्वीकृतः, वृत्तिनिर्गमास्वीकारेऽपि विषयेन्द्रियसन्निकर्षादिनैवापरोक्षत्वोपपत्तावपि तेनैव च विषयावच्छिन्नचैतन्यस्याभिव्यक्तिकल्पनादिना सर्वसामञ्जस्येऽपि प्रभारूपतेजसो विषयसन्निकर्षेणैव प्रकाशकत्वस्य दृष्टत्वात्, तेजस्त्वेनैव हेतुनाऽन्तःकरणे विषयसम्बन्धः प्राप्तो वृत्तिद्वारा संगम्यते इति वृत्तिनिर्गमो युक्तिसंस्पृष्ट एव, एवञ्च मनोवृत्तिनिर्गतिस्थले विषयापरोक्ष्यं तदनिर्गतिस्थले च पारोक्ष्यम्।

आवरणनिवृत्तिश्च तदीयं कृत्यम्। आवरणं चाज्ञानरूपं न घटादौ समस्ति तेषां जडत्वेनावरणात्मकतया तत्राज्ञानस्य निष्प्रयोजनत्वात् प्रकाशावारकत्वेन च तदीयं साफल्यमिति सर्वत्र

चैतन्यमेवावृणोति तत्। ब्रह्मचैतन्यं च गगनमिव कोटरकुटीरादिभिरवच्छिन्नं वर्तते घटादिभिः सकलैर्विकल्पैः। एवञ्च सा वृत्तिर्घटाद्यवच्छिन्नचैतन्यगतावरणं निवर्तयति। निवृत्ते च तस्मिन् चैतन्येनैव घटः स्फुरति तथा च घटादीनां पूर्वं वर्तमानतया चिदवच्छेदकत्वसम्भवात् तदवच्छिन्नचैतन्यगतावरणस्य पूर्वं विद्यमानत्वात् तन्निवर्तकत्वस्य मनोवृत्तौ सम्भवेन तत्साफल्यम्, एवं च सर्वत्र तादृशचैतन्यविषयकत्वेनैव प्रमाणानां प्रामाण्यम्, न तु घटादिविषयकत्वेन। अतएवाचकथदिदम् "सर्वप्रत्ययवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते," इति।

सति चैवं 'इदं रजतमित्यादिस्थलेषु इदम्पदार्थस्य शुक्तेरपि व्यावहारिकतया ज्ञानात्पूर्वं वर्तमानतया चिदवच्छेदकत्वसम्भवादिदमवच्छिन्नचिन्निष्ठामावृतिं भनक्ति मनोवृत्तिः। रजतस्य प्रतीतिकालमात्रवृत्तिकतया ज्ञानात्पूर्वमविद्यमानतया चिदवच्छेदकत्वासम्भवात् न तदवच्छिन्नचिन्निष्ठाज्ञानमस्ति, अत एव प्रातीतिकं ज्ञातसत्ताकमेवेति अनावृतमेवेति च व्यवहरन्ति। एतेनैवाभिप्रायेण देवदत्ताज्ञानविषयतावच्छेदकत्वपत्तिका विप्रतिपत्तिः प्राङ्न्यरूपि। रजतावच्छिन्नचिन्निष्ठाज्ञानासम्भवे च न मनोवृत्तिरपि तत्र प्रयोजनवती, अज्ञाननिवर्तकत्वेनैव तत्साफल्यस्य वर्णितत्वात्। रजतश्चेदमवच्छिन्नचिन्निष्ठाज्ञानपरिणतिः। इदमवच्छिन्नचितश्च विवर्तः। सत्येवं तदाविद्यकं रजतमपरोक्षप्रतीत्यन्यथानुपपत्त्या क्लृप्तोत्पत्तिकं केनापरोक्षीक्रियते इति विचारणायां साक्षिणैवेत्यभ्युपगम्यते, इदमेव हि साक्षित्वं यदनावृतविषयप्रकाशत्वं नाम। आविद्यकस्य चानावृतत्वं व्युदपादि पूर्वम्, अत एव च मनोधर्मान् सुखादीन् स एव प्रकाशयति, अत एव च तस्याऽनुव्यवसायस्थानापन्नत्वमपि संगच्छते, मनोधर्मस्य ज्ञानस्य भासकत्वादेव।

अविद्योपहितचैतन्यं तद्वृत्त्युपहितचैतन्यं वा साक्षी, स चायं साक्षी व्यावहारिकान् पदार्थान् मनोवृत्तिं ज्ञानं द्वारीकृत्य विषयीकरोति, प्रतीतिमात्रशरीरांश्च पदार्थानविद्यावृत्तिं द्वारीकृत्य, अज्ञातांश्चाज्ञानं द्वारीकृत्येति ।

तदिदमुच्यते, ज्ञाततयाऽज्ञाततया वा सर्वं साक्षिभास्यमिति । अविद्यावृत्त्यादिभासने तु निरपेक्ष एवायम्, वृत्तिरूपद्वारान्तरापेक्षायां हि भवेदनवस्थेति । व्यावहारिकपदार्थप्रकाशने त्ववश्यं मनोवृत्तिरपेक्षितव्या, नो चेदविद्योपहितचैतन्यस्य साक्षिणः सर्वदा सत्त्वात् सर्वस्य सार्वज्ञ्यमापतेत् । सुखादिप्रकाशने तु केचिदविद्यावृत्त्यपेक्षां मन्वते केचिन्नेत्यन्यदेतत् । तदित्थं सिद्धेयमविद्या वृत्ती रजतगोचरेति ।

अविद्यावृत्तिरियं रजतञ्चेति रूपद्वयेनाविद्या युगपदेव परिणमते, न तु पूर्वं रजतरूपेण पश्चाच्च वृत्तिरूपेण, मा भूद् रजतस्य प्रतीतिकत्वव्याहतिरिति । तत्र च परिणामे सम्प्रयोगसंस्कारदोषान् निमित्ततयाऽपेक्षते । तत्राधिष्ठानतावच्छेदकेन शुक्त्यादिना साकं सम्प्रयोगः पूर्वं कथितः, स चावश्यमपेक्षणीयः । तं विना भ्रमस्याऽदृष्टत्वात् । संस्कारश्चाध्यस्यमानतावच्छेदकरजतत्वादिप्रकारकानुभवजन्योऽपेक्ष्य एव, नहि हट्टस्थरजतादौ तादृशानुभवं विना रजतत्वप्रकारकभ्रान्त्याश्रयो भवति कश्चित्, मा भूदतिप्रसक्तिः । दोषश्च रागादिः, तदनपेक्षणे हि रजततया एव किमिति भ्रान्तः, अन्यधर्मप्रकारको भ्रमोऽस्य किं न समजनि इत्यादि पर्यनुयुज्येत । सादृश्यमपि केचिदध्यासहेतुतया स्वीकुर्वते केचिन्न, तत्सम्भवन्न निवार्यते, यत्र च स्फुटं तस्य न प्रतीतिः, तत्र कुसृष्ट्या तत्कल्पनमपि न रोचयामहे ।

नचैवं रजततज्ज्ञानयोर्युगपदुत्पत्तिस्वीकारेऽर्थाजन्यत्वाज्ज्ञानस्यापरोक्षत्वं न व्यवतिष्ठेतेति वाच्यम् । ईश्वरज्ञाने योगिज्ञाने वा

व्यभिचारात् नार्थजन्यत्वं प्रत्यक्षत्वप्रयोजकं, ज्ञानाकरणकज्ञानस्यापरोक्षत्वं प्रकृतेऽप्यस्तीति न दोषः।

तदेवमर्थस्येदमवच्छिन्नचित्यध्यारोपोऽर्थाध्यासपदेन व्यपदिश्यते। तादृशचिदाकारमनोवृत्त्यवच्छिन्नचिति रजताकारवृत्तेस्तदात्म्याध्यासो ज्ञानाध्यासपदेन व्यवह्रियते, एवञ्च मनोवृत्त्यविद्यावृत्त्योरपि तादात्म्याध्यासात् नाख्यातिसाम्यमपि। इदमाकारवृत्तेः साक्षिवेद्यत्वेन तदवच्छिन्नाज्ञानाभावेपि इदंवृत्त्यवच्छिन्नचैतन्ये शुक्त्यवच्छिन्नचैतन्यगोचराज्ञानसत्त्वेन तन्निबन्धन एव ज्ञानाध्यास इति। अविद्यावृत्तौ ज्ञानत्वास्वीकाराच्च न ज्ञानद्वयमादायाख्यातिसाम्यम्। अपि चावरणनाशरूपफलविशिष्टत्वेनेदमंशावच्छिन्ना चिदेव पूर्वाभिहितरीत्या फलम्। न तु रजतावच्छिन्ना, तत्रावरणप्रसक्तेरेवाभावात्, एवञ्च फलैक्यात् द्वयोरपि चिद्वृत्त्योरैक्येन व्यवहार इति ध्येयम्। इयञ्चाध्यासस्य मुख्या भिदाद्वयी, अपरोऽस्या एव प्रभेद इति। केषुचिद्ग्रन्थेषु ज्ञानस्य ब्रह्मणोऽध्यस्तप्रतियोगिकतयाऽध्यास एव ज्ञानाध्यासशब्देन व्यवहृतः। अर्थस्याध्यस्तस्य ब्रह्मभिन्नस्य स्वरूपेणाध्यासोऽर्थाध्यास इति च व्यवजह्रुः, अमू च भेदौ संसर्गाध्यासपदेन स्वरूपाध्यासपदेन च व्यपदिष्टौ, एवं धर्माणामध्यासो धर्माध्यासतया, धर्मिणश्च स धर्म्यध्यासतया उल्लिखिताविस्येषा षडध्यासी। अपरं च प्रभेदं निरूपयामासुस्त्रैविध्येन, ज्ञानविशिष्टः अज्ञानविशिष्टः ज्ञानाज्ञानविशिष्टश्चेति। तत्राद्यः शुक्तिरजतादिभ्रमः अविद्यावृत्त्या सहैवोत्पन्नत्वात्, वियदादेरध्यासो द्वितीयः अज्ञानविशिष्टतया जातत्वात्, अज्ञानस्य चानादित्वेऽपि विशिष्टाकारेणोत्पत्तिर्बोध्या। ज्ञानाज्ञानविशिष्टभ्रमस्तु परोक्षस्थल एव, तत्र सामान्यतोऽनुमित्यादिरूपज्ञानस्य विशेषरूपेण चाज्ञानस्य विशेषविशिष्टतया जायमानत्वात् परोक्षभ्रमानङ्गीकारे च

भेदद्वयमेवेति ।

न केवलं रजतादिभ्रमे ज्ञानरजतयोरेवोत्पत्तिरिति मन्तव्यम् विषयता अपि जायन्ते। तथाहि, इदमवच्छेदेन रजतं रजतविषयत्वं रजततादात्म्यं रजतादात्म्यविषयत्वमिति चत्वारि जायन्ते, रजतविषयतावच्छेदेनापि एतान्येव। यस्य यदवच्छेदेनाध्यासः तस्य तद्विषयत्वावच्छेदेनापि स इति नियमात्। एतच्च "इदं रजतं जानामीत्यनुभवसाक्षिकम्। रजतमिदं जानामीत्यनुभवस्थले तु रजतावच्छेदेन रजतविषयत्वावच्छेदेन च इदंतादात्म्यं इदंतादात्म्यप्रतियोगित्वोपहितेदमादि, इदंतादात्म्यविषयत्वं, इदंतादात्म्यप्रतियोगित्वोपहितेदमादिविषयत्वमित्येतानि चत्वारि समुत्पद्यन्ते। तदेतत् सर्वमपरोक्षानुभवान्यथानुपपत्त्यैव कल्पितमिति नात्र गौरवविभीषिका समुन्मिषति, यथाहुः—

प्रमाणवत्त्वादायातः प्रवाहः केन वार्यत इति

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि,

अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणक इति। न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ सृजते इत्यादिश्रुतेः स्वप्नानिर्वाच्योत्पत्तौ प्रमाणत्वात्, सच्च त्यच्चाभवत् सत्यं चानृतं चाभवदिति श्रुतौ च सत्यपदेन व्यावहारिकोत्पत्तिमभिधायानृतपदेन प्रातिभासिकोत्पत्तेरभिधानात्। तस्मादुदारहृदयैर्विहाय दारिद्र्यमेतत्स्वीकृतौ न सङ्कोचो लेशतोऽपि कार्य इति।

वस्तुतस्तु नैयायिकमते दोषनिष्ठकारणतानिरूपितकार्यता रजतविषयकभ्रमत्वावच्छिन्ना, भ्रमत्वं च तदभाववति तत्प्रकारकत्वमिति कार्यतावच्छेदकतया बहूनां प्रवेश इति महागौरवम्, अनिर्वाच्योत्पत्तिवादे तु सा कार्यता रजतत्वावच्छिन्नेति महल्लाघवम्। तादृशजन्यतायाः प्रातिभासिकव्यावहारिकसाधारणतया प्रातिभासिकत्वस्यापि जन्यतावच्छेदककोटावप्रवेशनीयत्वात्। एव-

मिदं रजतमिति भ्रमं प्रति नेदं रजतमिति बाधबुद्धेः प्रतिबन्धकत्वात् तदभावस्य कारणत्वे वाच्ये नैयायिकनये समवायसम्बन्धेनेदन्त्वावच्छिन्नविशेष्यतानिरूपिततादात्म्यनिष्ठसंसर्गतानिरूपितरजतत्वावच्छिन्नप्रकारताकचाक्षुषत्वावच्छिन्नं प्रति इदन्त्वावच्छिन्नानुयोगिताकरजतत्वावच्छिन्नप्रतियोगिताकभेदबुद्ध्याद्यभावस्य कारणत्वम्। वेदान्तिनये तु इदन्त्वावच्छिन्नविशेष्यतानिरूपिततादात्म्यसंसर्गतानिरूपितस्वनिष्ठप्रकारताशालिचाक्षुषसमवायेन तादृशचाक्षुषसम्बन्धेन वा रजतत्वावच्छिन्नं प्रति तादृशबाधाभावस्य कारणत्वमिति रजतत्वाद्यवच्छिन्नत्वस्य चाक्षुषीयसमवायस्य चानिवेशेन लाघवमिति सूक्ष्मतममाऽऽचार्यैरद्वैतसिद्धान्तविद्योतने निरूपितमिति तत एव कणेहत्यावलोकनीयम्। द्वितीयकार्यकारणभावस्यायमाशयः, इदमवच्छिन्नचिति रजतस्योत्पत्तेस्तत् तादृशचाक्षुषसम्बन्धेन तत्र वर्तते, चाक्षुषस्य स्वोपादानावच्छिन्नत्वसम्बन्धेन प्रमातृवृत्तितया प्रमातुश्चेदमवच्छिन्नचैतन्यैक्यमापन्नतया इदमवच्छिन्नचैतन्यवृत्तित्वसम्भवः। एतेन भेदग्रहरूपबाधाभावस्यापि तत्र वृत्तित्वं व्याख्यातम्।

चाक्षुषसमवायसम्बन्धत्यागे त्विदं बीजम् समवायेन चाक्षुषस्यान्तःकरणवृत्तितयेदमवच्छिन्नचैतन्ये प्रमात्रभिन्नेऽवृत्तित्वात् तादृशचाक्षुषसमवायेन रजतस्य तादृशचैतन्ये उत्पत्तेर्वक्तुमशक्यत्वात् तादृशचाक्षुषोपादानावच्छिन्नत्वादिसम्बन्धेन तदुक्तौ गौरवात्। इदमादौ तदवच्छिन्नचितौ च विषयतादिना वृत्तिमतस्तादृशचाक्षुषस्य रजतवृत्तितावच्छेदकत्वसम्भवात्।

नच रजतत्वप्रकारकचाक्षुषस्यासम्भवः तस्य सन्निकर्षजन्यत्वेन सन्निकर्षं प्रति च सन्निकृष्टस्य कारणत्वेन तस्य ज्ञातसत्ताकरजताजन्यत्वात् तदसम्भवादिति वाच्यम् साक्षिभास्यतया प्रथमक्षणस्थेन द्वितीयक्षणे इन्द्रियसन्निकर्षे सति तृतीयक्षणवृत्तिचाक्षुष-

विषयत्वसम्भवात्। नच द्वितीये तृतीये वा क्षणे सति बाधे सन्निकर्षबाधेयुक्तेरसम्भव इतिवाच्यम् अधिष्ठानतावच्छेदकेदमा-दिगतचाक्षुषत्वस्यैव रजतादौ प्रतीतेरभ्युपगमान्न दोषः, निरूपितं चैतत् प्राक्।

यदुत्कर्षापकर्षौ यदुत्कर्षापकर्षानुविधायिनौ तस्य तत्कार्य-त्वमिति न्यायात् शङ्खपीतिमोत्कर्षापकर्षयोश्च पित्तोत्कर्षापकर्षा-नुविधायित्वदर्शनात् शङ्खपीतिम्नः पित्तजन्यत्वं वाच्यम्। एव-मन्यत्रापि तत्तद्भ्रमे बोध्यमिति सिद्धाऽनिर्वाच्योत्पत्तिः। न च तत्र शङ्खपीतिमज्ञानोत्कर्षो नतु विषयोत्कर्ष इति वाच्यम् साकार-वादप्रसङ्गेन बहिर्विषयापलापापत्त्या ज्ञाने स्वत एवोत्कर्षस्य वक्तुम-शक्यत्वेन विषयोत्कर्षध्रौव्यात्। न च जपाकुसुमसान्निध्ये स्फ-टिके लौहित्यान्यथाख्यातिस्वीकारवत् चक्षुर्द्वारा शङ्खसंलग्नपित्त-गतपीतिम्नः सन्निहितस्यारोपाभ्युपगमोऽस्तु किं तदुत्पत्तिस्वीका-रेणेति वाच्यम् तथासति सर्वोऽपि शङ्खसंयुक्तेन्द्रियो जनः शङ्खं पीत-त्वेन प्रतीयात्। न चोत्पत्तिस्वीकारेऽप्ययं प्रसङ्ग इति वाच्यम् यस्या-विद्यावृत्तिसहितं यदुत्पन्नं तस्यैव प्रतीतिगोचरस्तदिति नियमात् ज्ञानार्थयोर्युगपदध्यासस्वीकारात्। न च देवदत्तीयपीतिम्नोऽन्यं प्रत्यतीन्द्रियत्वं परिकल्प्योक्तातिप्रसङ्गो निरसनीय इति वाच्यम् लाघवेन पुरुषमात्रं प्रत्यतीन्द्रियत्वकल्पनौचित्यात्, ईश्वरयोग्यति-रिक्तत्वं तु पुरुषे त्वयाऽपि निवेशनीयमिति न तन्निवेशप्रयुक्तं गौरवमुद्भावनीयम्। जपाकुसुमसान्निध्यस्थलेऽपि उत्पत्त्यनुत्पत्ति-स्वीकारे वेदान्तिनां स्वगोत्रकलहोऽस्त्येव, पञ्चपादिकाकृदादिभि-स्तत्रोत्पत्तिस्वीकारादिति। रजतत्वं पारमार्थिकत्वाभिमतरजत-व्यक्तिभिन्नव्यक्तिवृत्ति सकलरजतव्यक्तिवृत्तिजातित्वात् सत्ताव-दित्यनुमानेनापि प्रातीतिकं रजतं साधयामासुः।

अत एव ज्ञानमेवोत्पद्यतां किंविषयोत्पत्त्येति नागेशादीनां मतं पराकृतम् । उक्तं हि रजतसंयोगत्वेन रजतप्रत्यक्षं प्रति कारणता व्यावहारिकस्थले क्लृप्तेति कथं विषयं विना प्रत्यक्षं सम्भवेत् ।

विज्ञानवादप्रसङ्गश्च स्यात्, ज्ञानस्यैव बहिर्भूतरजताकारता-स्वीकारेण विषयापरोक्षतोपपादने, नच ज्ञानातिरिक्तमसदेवेति वक्तुमुत्सोढव्यम्, प्रत्यक्षादिविरोधात्, विस्तृतं चैतदस्माभिरन्यत्रेति नेह वितन्यते ।

एवमलीकमेव रजतमिति, शुक्तिपरिणामस्तदिति च ब्रुवन्तोऽवहेलनीयाः । कथं हि नाम गगनकुसुमायमानं रजतमपरोक्ष-प्रतीतिगोचरतामासादयेत् कथं च शुक्तेः क्षीरस्येव दधि परिणामो रजतं समीपोपसर्पणसमनन्तरं नेदं रजतमितिबाधविषयतामा-लम्बेत । नो खलु क्षीरस्य दध्यात्मना परिणत्यनन्तरं नेदं दधीति प्रमिन्वन्ति लौकिकाः । तथा बुध्यमाना वा न भवन्ति भ्रान्ताः । तथा सति नेदं रजतमित्यादेरेव भ्रान्तित्वादहो समर्थितो भ्रान्त्यभाववादः ।

दोषजनितं तद् दोषापगतावपगतमिति नेदं रजतमित्यपि समीचीनमेवेति चेत् । सत्यत्वे रजतस्य शुक्तिपरिणतेः दोषजन्य-त्वस्यानुपपत्तेर्हट्टस्थरजतवदेव । नापि च निमित्तापाये नैमित्तिकाप-गमनं प्रतियन्ति प्रमातारः । कफापाये ज्वरापगतिः श्रुत्यतिथिर-भूदिति चेत् । तत्रापि धातुसाम्यमेव क्रियते कफापगत्या, पश्चाज्ज्वरेणापगम्यते इति ।

एवं निम्बार्कादिभिःस्वीकृताःख्यातयोऽप्युक्तास्वेवान्तर्भवन्ति तस्मात् तासां खण्डनेनैव खण्डिता बोध्याः । तथाहि,निम्बार्कमते जीवेश्वरजड़ानां परस्परं भेदाभेदौ स्वीक्रियेत इति शुक्तिरजतयोरपि तावेव, हट्टस्थरजतमेव च शुक्तितादात्म्येनैव भासते नतु भेदाभे-

दाभ्यां, तत्र चाभेदप्रतीतेः प्रमात्वेऽपि भेदाविषयकत्वेन भ्रमत्वम्, उभयवत्येकमात्रावगाहनादित्यन्यथाख्यातिरेवेयम् नव्यनैयायिकानुसारिणी। तादात्म्यस्य च सत्त्वेन संसर्गस्यासतोऽभानान्न प्राचीननैयायिकानुवर्तिनीति।

वल्लभमतख्यातिस्तु सत्ख्यात्यन्तर्गता। तन्मते सर्वं ब्रह्मपरिणामः, ब्रह्म च सच्चिदानन्दात्मकं, जीवत्वं चावृतानन्दकत्वं, जडत्वं चावृतचिदानन्दकत्वं, अलीकस्तु न पदार्थः। परिणामश्च द्विविधः, दुग्धस्य दधीव कारणविकृतिहेतुरेकः, कारणाविकृतिहेतुश्चापरः, यथा कल्पतरौ स्वसन्निधमुपगतकाम्यप्रदायिनि, नहि तत्र कल्पतरौ कश्चिद्विकारो जायते, तत्र भ्रमस्थले शुक्तिराद्यो ब्रह्मपरिणामः, रजतं तु द्वितीय इति ब्रह्मपरिणामत्वाद्रजतं सदेवेति। तदेतत्तु सर्वथाऽसङ्गतम्। नित्यस्य परिणामानुपपत्तेः श्रुत्या च युक्तिविरुद्धार्थस्योपदेष्टुमशक्यत्वात्। नहि सहस्रमप्यागमा घटं पटयितुमीशते, मायामादायैव च ब्रह्मपरिणामप्रतिपादकत्वोपपत्तेरिति।

माध्वैस्तु—सदुपरागेणालीकस्य भानम्, अधिष्ठानातिरिक्तं च सर्वमलीकमेवेति स्वीक्रियते। तदेतदखण्डि पूर्वमिति।

अचिन्त्यभेदाभेदवादिनामपि एषैवास्मिन् विषये रीतिरिति न पृथक् निराकरणमपेक्षते।

माध्वमतात्तेषां भिदा त्वियं प्रसङ्गाद्बोध्या, जीवब्रह्मणोर्भेदो माध्वमते। अत्र तु भेदाभेदौ, तत्राचिन्त्यत्वं च शब्दानुमितिप्रत्यक्षरूपप्रमाणत्रयाविषयत्वम्, अन्येषां प्रमाणानामेतेष्वेवान्तर्भावात् ब्रह्मणश्च जातिगुणक्रियासम्बन्धात्मकप्रवृत्तिनिमित्तचतुष्टयशून्यत्वेन शब्दाविषयत्वात्, अलौकिकत्वेन प्रत्यक्षाविषयत्वात् तादृशे व्याप्तिग्रहासम्भवेनानुमानाविषयत्वात्. भेदग्रहे चावश्यं प्रतियोग्यनुयोगिग्रहापेक्षणात्, अचिन्त्यप्रतियोग्यादिकत्वेन च

भेदस्याचिन्त्यत्वात् । एतेनाभेदस्याचिन्त्यत्वं व्याख्यातम् । ब्रह्माग्रहणे तदभेदस्याशक्यग्रहत्वादिति ।

एतेन—"सोमाभावे च पूतीकग्रहणं श्रुतिचोदितं,
सोमावयवसद्भावादिति न्यायविदो विदुः ॥१॥
व्रीह्यभावे च नीवारग्रहणं श्रुतिचोदितं,
तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् ॥२॥
शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव बोधितः,
रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः ॥३॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते,
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ॥४॥
कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः,
रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते ॥५॥
दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते,
अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ॥६॥
बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते,
शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ॥७॥
नातो मिथ्यार्थसत्यार्थविषयत्वनिबन्धना,
एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः" ॥८॥

"स्वप्ने च प्राणिनां पुण्यपापानुगुणं भगवतैव तत्तपुरुषमात्रानुभाव्या तत्तत्कालावसानास्तथाभूताश्चार्थाः सृज्यन्ते' इति परास्तं वेदितव्यम् । भ्रमस्य सर्वानुभवसिद्धस्यानुपपत्तेर्बाधानुपपत्तेश्च । त्रिवृत्करणश्रुत्या सर्वस्य सर्वात्मकत्वे क्वायं भ्रमः । त्रिवृत्करणमस्माकमपि सम्मतं श्रौतत्वात्, किन्तु नैतावता घटे पटप्रतीतिरपि प्रमा स्यात् व्यवहारमनुरुन्धाने हि घटे घटत्वप्रकारकप्रतीतेः प्रमात्वं स्वीकार्यं व्यवहारेऽबाधात् न तु पटत्वप्रतीतेरपि व्यवहारे बाध्यमानायाः ।

अपि च सुरा कैः पदार्थैर्निर्मीयते तेषां कस्यचित्, क्षीरादेश्च पानादपि प्रत्यवेयात्, तेषामपि सुरात्मकत्वेन । अथ तत्र भूयस्त्वं सुरावयवानां नास्ति, तर्हि स्वल्पस्तु प्रत्यवायः स्यादेव । अपि च सुरा न पातव्या इति श्रुतौ भूयस्याः सुरायाः पानेनैव प्रत्यवाय इति न श्रुतं, केवलं सुराशब्द एव श्रुतः, तथा च स्वल्पसुरावयवकदुग्धादिपानात्प्रत्यवेयादेव । तस्मात्सर्वथा पानभक्षणादिकं परित्यज्योपोष्यतामिति कष्टामाविष्टोसि दशामिति ।

अथ तत्र सुरात्वं धर्मो नाङ्गीक्रियते, तर्हि क्वाङ्गीक्रियते ? यत्र सुरात्वप्रकारकप्रतीतिरस्ति चेत् सा यदि कस्यचित् सुरानिधानसदृशनिधानस्थजलादौ समजनि, तस्य पानात्स तर्हि पापभाग्भवेदेव । सुरात्वप्रकारकप्रमात्वं प्रतीतौ विवक्षितमिति चेत् तत्किं सर्वस्य ज्ञानस्य प्रमात्वं भणतस्तव मते जले तादृक्प्रतीतिर्न प्रमा । अस्ति सा प्रमा, किन्तु जलं सुरात्वेन वृद्धव्यवहारगोचरो नास्तीति चेत् तर्हि आयातोऽसि मार्गे । पारिभाषिकमिदं प्रमात्वम् यद्धर्मप्रकारको व्यवहारो वृद्धपरम्परागतो यत्र तत्र तद्धर्मप्रकारकप्रतीतिः प्रमा अन्यत्र तु भ्रम इति भ्रान्तिवादिनो ब्रुवते, तच्च त्वयापि वाचोभङ्ग्यन्तरेणाङ्गीकृतमेव, नो चेत् किमिति वृद्धव्यवहारं शरणीकरोषि, तदलं प्रच्छादनैः । सोमाभावे पूतीकग्रहणं तु श्रुतिचोदितत्वात् विधिबलादेवानुष्ठास्यते । नो चेत् श्रुतेरपेक्षैव का । सादृश्यमात्रान्धवादृशैः स्वयमेव ग्रहीष्यते त्रिवृत्करणश्रुतिविचारनिपुणैः ।

स्वल्पसादृश्यवन्मा ग्राहि भूयः सादृश्यवदेव च गृह्येत, अन्यथाऽदृष्टानुत्पत्तेरित्यर्थं श्रुतिरिति चेत् तर्हि यावददृष्टं सोमोपयोगाद्भवति तावत्पूतीकोपयोगाद्भवति न वा । तावदेव भवति चेत् सोमपूतीकयोः सर्वात्मनैकत्वाभावात् न भवत्येव किमिति न ? । सर्वात्मनैकत्वाभावेऽपि चोदनाबलाद्भविष्यतीति चेत् तर्हि कि-

मन्तर्गतेन सादृश्येन गवेष्यमाणेन। न्यूनमदृष्टं जायत इति चेत्तर्हि अन्येन स्वल्पसदृशेनापि न्यूनं भविष्यत्येव। तदपेक्षया भूयः सादृश्यवदुपयोगादधिकं भवतीति चेत् तर्हि अधिकादृष्टलिप्सुना तदेवोपादास्यते किं श्रुत्या। अपि चादृष्टार्थानां न प्रतिनिधिरिति न्यायेन प्रतिनिधिपूतीकस्य दृष्टार्थत्वेऽपि तस्यैव ग्रहणं नान्यस्येत्यत्र श्रुतिरेव नियामिका स्यात्। तस्मात् सम्भवमात्रेण सादृश्यमुपष्टम्भमात्रमेव श्रुतेर्व्यधायि मीमांसकैरिति नापेशलम्। तस्मात्स्वप्नेऽप्याध्यासिकयेव सृष्टिरधिष्ठानं चात्मैव, जाग्रतीव च तत्रापि धर्मत्वेनैवाध्यासात् नाहं सुखमिति प्रतीतेरापत्तिः। भगवतस्तु व्यावहारिकप्रपञ्चस्य व्यवहारे बाधाभावदर्शनात् न व्यवहारे बाध्या सृष्टिस्तदीयेति। तदेवं ब्रह्मैव सर्वत्राविद्ययाऽधिष्ठानम्। अविद्यायास्तत्र स्वप्रकाशत्वेऽपि पूर्वोक्तार्थापत्त्यादिभिः साधितत्वादेव सामान्यविशेषभावस्य कल्पितस्य सम्भवात्सामान्यता ज्ञातत्वे सति विशेषतोऽज्ञातत्वमधिष्ठानत्वं सम्भवत्येव।

"अदृश्यो दृश्यते राहुर्गृहीतेनेन्दुना यथा"।

तथाऽनुभवमात्रात्मा दृश्येनात्माऽवलोक्यते॥

इति रीत्या कालादिप्रत्यक्षवच्च ब्रह्मणः प्रत्यक्षभ्रमेऽधिष्ठानत्वोपयुक्तं प्रत्यक्षं सम्भवति? अपरापि सरणिरभ्यधायि आचार्यैः "अध्यस्तद्रव्यत्ववति गुणादौ रूपानपेक्षचाक्षुषत्वदर्शनेन वस्तुन्यूनसत्ताकद्रव्यत्ववत्प्रत्यक्षे एव चक्षू रूपमपेक्षते ब्रह्मणि च द्रव्यत्वं स्वापेक्षया न्यूनसत्ताकमेवेति" तस्य चाक्षुषत्वाद्युपपत्त्याधिष्ठानत्वोपपत्तिरिति।

सति चैवं "नासीदस्ति भाविनी वा रजतव्यक्तिः, मिथ्यैव मम रजतप्रभा" इत्याद्यनुभवसिद्धं स्वाधिष्ठाने त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं सदसद्विलक्षणत्वादिरूपं वा रजतादिगतं वियदादिप्रपञ्चेऽपि पूर्वोक्तरीत्या श्रुत्या सिद्धमपि श्रुत्यर्थे

विप्रतिपन्नाय सद्धेतुलक्षणोपपन्नैर्दृश्यत्वादिभिः स्वव्यवहारे नियमतः स्वातिरिक्तसंविदपेक्षत्ववृत्तिविषयत्वाद्यात्मकैः व्याप्त्युपसंहारस्थलरजतादिकैः साध्यते, तादृशमिथ्यात्वं विना दृश्यत्वादीनामनुपपत्तेः। आध्यासिकसम्बन्धं विना दृग्दृश्यसम्बन्धानुपपत्तेः, सति चाध्यासिकसम्बन्धेऽधिष्ठानाध्यस्तयोरेव तस्य सम्भवात् दृग्दृश्ययोरेकतरस्याधिष्ठानत्वमपरस्य चाध्यस्तत्वं वाच्यं तत्रानुस्यूतत्वात् साक्षित्वाच्च दृश एवाधिष्ठानत्वमन्यत्तु अध्यस्तमेवेति निश्चिक्ये समधिगताधिगन्तव्याधिगमैः मुनीन्द्रैः। यदाहुः—

यतो ब्रह्मणि वेद्यत्वं गीर्वाणैरपि दुर्भणम्
श्रुतिबाधभयात्तस्मान्मिथ्या दृश्यं नियामतः॥
अविद्यायोनयो भावाः सर्वे भो बुद्बुदा इव
क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम्॥

घटादिकं सद्रूपे कल्पितं तदनुविद्धत्वेन प्रतीयमानत्वात् सामान्यव्याप्त्या चन्द्रानुविद्धजलतरङ्गवत्" इति।

ननु ब्रह्मणि वेद्यत्वादिकमस्ति नवा, न चेत् सर्वाधिष्ठानता कथम्, अस्ति चेत् तस्यापि मिथ्यात्वात् शून्यवादप्रसङ्ग इति चेत् अस्ति इत्येवोत्तरं परं त्वाध्यासिकसम्बन्धेन, न तु स्वरूपसम्बन्धेन, स्वरूपसम्बन्धेन वर्तमानं सदेव स्वाश्रयमिथ्यात्वप्रयोजकं यथा साध्याभाववद्वृत्तित्वरूपा व्याप्तिः कालिकेन जले वर्तमानापि तस्य व्याप्यत्वं नावहति धूमे स्वरूपसम्बन्धेन तिष्ठन्ती तं व्याप्यीकरोत्येवेति न दोषः।

तदेवं ब्रह्मैव परमार्थसदिति स्थितं, तच्च चिदानन्दात्मकमेव न तु तयोराधारः, तथा सति तौ नित्यौ वाऽनित्यौ वा स्याताम्, नाद्यः, नित्यस्य निराधारत्वेन साधारत्वानुपपत्तेः, न खलु क्वापि दृष्टं, नित्यश्च कश्चिद्वर्तते चेति। गुणस्य नित्यस्यापि परमाण्वादिवृत्तेरिति चेत्, अस्य स्वाश्रियान् प्रत्येव तात्त्वन्वात्, गुणश्च निल-

रुचेत्येव व्याहतम् । विमता गुणा अनित्या गुणत्वात् घटरूपादि-वदित्यनुमानोपपत्तेश्च । परमाणवश्चानित्या गुणाश्रयत्वाद्घटा-दिवत् । नच तेषामनित्यत्वे कारणधाराऽविश्रान्तिरिति वाच्यम् ब्रह्मणि सर्वस्यापि विश्रान्तेः । नच घटसर्षपयोरैक्यप्रसङ्गोऽपि, मायिकत्वेऽपि न्यूनाधिकावयवकत्वोपपत्तेः । ब्रह्मणश्चानित्य-गुणाश्रयत्वेऽनित्यत्वप्रसक्तौ शून्यवादप्रसङ्गान्न द्वितीयोऽपि । श्रुतिश्च परमाणुगगनादिप्रतियोगिकाभावमाह प्रलये "नासीद्रजो न व्योम परो यदि" ति ऋग्वेदीया ।

तस्मात् सच्चिदानन्दात्मकब्रह्मातिरिक्तं मिथ्याभूतं विहासा-स्पदमेवेति तत्र उपरन्तव्यं नित्यपरिपूर्णानन्दरिरंसुभिरिति । यदाह श्रुतिः—"एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" ।इति।

"वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति" स्मृतिश्च ।

"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति च ।"

—— त्विदमद्वैतराजवर्त्म चिदानन्दामृतांशुद्भास्यमानं मनागपि न दोषकण्टकैः संस्पृष्टं शान्ततरैरवधीरितभवजन्मसुखैरहिंसादि-यमानुष्ठानबद्धपरिकरैर्निषेव्यमाणं रागद्वेषाविद्यादिकलोपप्लव-लोपहेतुः परमपुरुषार्थफलं साधनान्तरमनपेक्ष्यैव च लोकोत्तरा-नन्दानुभूतिरूपदृष्टफलसाधनं चेति यदगादि श्रुत्या—

"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत"

तज्जलानिति ब्रह्मोत्पत्तिप्रलयस्थितिकमित्यर्थः । ततश्च यतितव्यं तदाप्तये इति । तदमूरानन्दभराः सततं निपीय प्रमोदि-षीमहि परस्मिन् चिदेकरसे वयममी, इत्याशास्महे भगवतोऽधो-क्षजात्—चेतोऽनुरज्यतु कदापि न नश्वरेषु,

भोग्येषु सारविधुरेषु विकल्पितेषु ।

शान्तिः परापि लसतात्सुमनोमनस्सु
या दुर्लभा सुमनसां सुमनोऽधिगम्य ।
प्राच्यैर्नव्यैर्निबन्धैरुपनिषदनुगैस्तर्कविन्निर्मितैश्च,
सारादानाहृतैस्तैः समचकलमहं भ्रान्तितत्त्वं विकीर्णम् ।
ख्यातौ वादे ह्यमुष्मिन्नतिसरलतनौ शम्बरारात्यरातेः,
स्थाने पुण्येऽतिरम्ये विमलघनरुचेस्तोषहेतोस्सुतोषे ।

ॐ तत् सद्ब्रह्मणे नमः ॥

इति श्रीशङ्करचेतनभारतीविरचितः ख्यातिवादश्चरमवर्णध्वंसमगात् ।

## ॥ अशुद्धि विशेष सूचीपत्रम् ॥

| पं | अशुद्धं | शुद्धं |
|---|---|---|
| १ | धर्मि प्रकारको | धर्मिकोटिताको |
| १५ | त्वस्यवृत्ते | त्वस्यावृत्ते |
| १६ | मंरयान्य | मंस्यान्य |
| १४ | स्मृति | स्मृतिः |
| २ | पक्दै | एकदै |
| २३ | म ं | मतं |
| ११ | इ ं | इदं |
| २६ | वैधर्म्यातं | वैधर्म्यात् |
| २ | धसं | ध्वस |
| ३ | मा ं | मान्यं |
| १८ | सदसदसत्त्वं | सदसत्त्वं |
| १४ | संवि | संविदं |
| १६ | तरमा | तस्मा |
| २० | नश्वरतं | नश्वरत्वं |
| १७ | व्यवन्हि | व्यवह्नि |
| १६ | वोध | बाध |
| २१ | शुक्ताध्य | शुक्तयध्य |
| १४ | नांभ्यु | नाभ्यु |
| १८ | भ्युपग | भ्युपग |
| १६ | शक्तया | शुक्तया |
| ५ | प्रसाणं | प्रमाणं |
| ३ | यच्चा | यच्चात्र |
| १६ | यकत्व | यकत्वं |
| २३ | तद्भद | तद्भेद |
| ८ | चैन्मै | चे मै |
| १३ | त्व | त्वं |
| २० | सिध्येयेत् | सिध्येत् |
| ११ | कथमृव्य | कथमव्य |

| पृ० | पं | अशुद्ध | शुद्ध |
|---|---|---|---|
| ४३ | २६ | श्चित | श्चित् |
| ४५ | ११ | प्राश | प्रकाश |
| ४६ | २६ | सतन्मूल | स्तन्मूल |
| ५५ | ७ | वर्तंत | वर्तते |
| ५५ | २३ | ब्रह्मज्ञा | ब्रह्मज्ञा |
| ६६ | १८ | निरनी | निरसनी |